*Poona Oriental Series No. 9*

# THE

# SĀṀKHYA--KĀRIKĀ

*Is'vara Kṛṣṇa's Memorable Verses on Sāṁkhya Philosophy*
*with the Commentary of Gauḍapādācārya*

**श्रीमदीश्वरकृष्णप्रणीताः सगौडपादभाष्याः**

# सांख्यकारिकाः

*Critically edited with Introduction, Translation and Notes*

BY

*Vidyāsudhākara* **Dr Har Dutt Sharma**, M.A., Ph.D.,

**ORIENTAL BOOK AGENCY**
15, Shukrawar, POONA 2 ( India ).

# THE
# SĀṀKHYA-KĀRIKĀ

*Īs'vara Kṛṣṇa's Memorable Verses on Sāṁkhya Philosophy with the Commentary of Gauḍapādācārya*

श्रीमदीश्वरकृष्णप्रणीताः सगौडपादभाष्याः

# सांख्यकारिकाः

विस्तृतोपोद्घातपाठान्तरटिप्पण्यादिभिः समलङ्कृताः

BY

*Vidyāsudhākara* **Dr Har Dutt Sharma**, M.A., Ph.D.,
*Professor of Sanskrit, Sanātana Dharma College, (Nawabganj) Cawnpore.*

POONA

THE ORIENTAL BOOK AGENCY

1933

## कारिकाणां सूची


| कारिकाङ्काः | | पृष्ठाङ्काः | कारिकाङ्काः | | पृष्ठाङ्काः |
|---|---|---|---|---|---|
| ३४ | बुद्धीन्द्रियाणि तेषाम् | ... ३४ | इ | सप्तत्यां किल येऽर्थाः | ... ६१ |
| २६ | बुद्धीन्द्रियाणि चक्षुःश्रोत्रघ्राण | २८ | ६७ | सम्यग्ज्ञानाधिगमात् | ... ६० |
| ४८ | भेदस्तमसोऽष्टविधः | ... ४४ | ३७ | सर्वम् प्रत्युपभोगम् | ... ३६ |
| १५ | भेदानाम्परिमाणात् | ... १७ | ४३ | सांसिद्धिकाश्च भावाः | ... ४० |
| ३ | मूलप्रकृतिरविकृतिः | ... ४ | ३५ | सान्तःकरणा बुद्धिः | ... ३५ |
| ३० | युगपच्चतुष्टयस्य तु वृत्तिः | ... ३१ | २५ | सात्त्विक एकादशकः | ... २७ |
| ५९ | रङ्गस्य दर्शयित्वा ... | ... ५२ | ६ | सामान्यतस्तु दृष्टात् | ... ८ |
| ६३ | रूपःसप्तभिरेव तु ... | ... ५७ | १७ | संघातपरार्थत्वात् ... | ... २० |
| ५७ | वत्सविवृद्धिनिमित्तम् | ... ५२ | ८ | सौक्ष्म्यात् तदनुपलब्धिः | ... ९ |
| ४५ | वैराग्यात् प्रकृतिलयः | ... ४२ | ३१ | स्वां स्वाम्प्रतिपद्यन्ते | ... ३२ |
| २८ | शब्दादिषु पञ्चानां | ... ३० | २९ | स्वालक्षण्यं वृत्ति ... | ... ३० |
| आ | शिष्यपरम्परयागतम् | ... ६१ | ३९ | सूक्ष्मा मातापितृजा | ... ३७ |
| १३ | सत्त्वं लघु प्रकाशकमिष्टम् | १६ | १० | हेतुमदनित्यमव्यापि | ... १० |


---

श्रीमदीश्वरकृष्णप्रणीताः

# सांख्यकारिकाः

गौडपादविरचितभाष्यसहिताः

श्रीगणेशाय नमः

कपिलाय नमस्तस्मै येनाविद्योदधौ जगति मग्ने ।
कारुण्यात्सांख्यमयी नौरिव विहिता प्रतरणाय ॥
अल्पग्रन्थं स्पष्टं प्रमाणसिद्धान्तहेतुभिर्युक्तम् ।
शास्त्रं शिष्यहितायं समासतोऽहं प्रवक्ष्यामि ॥

दुःखत्रयाभिघाताज्जिज्ञासा तदभिघातके[1] हेतौ ।
दृष्टे साऽपार्था चेन्नैकान्तात्यन्ततोऽभावात् ॥ १ ॥

१ अन्वयः । —दुःखत्रयाभिघातात् तदभिघातके हेतौ जिज्ञासा (भवति) सा दृष्टे (हेतौ) अपार्था चेत्, न, एकान्तात्यन्ततोऽभावात् ।

दुःखत्रयेति । अस्या आर्याया उपोद्घातः क्रियते । इह भगवान् ब्रह्मसुतः कपिलो नाम । तद्यथा—

सनकश्च सनन्दनश्च[2] तृतीयश्च सनातनः ।
आसुरिः कपिलश्चैव वोढुः पञ्चशिखस्तथा ।
इत्येते ब्रह्मणः पुत्राः सप्त प्रोक्ता महर्षयः ॥

कपिलस्य सहोत्पन्नानि[3] धर्मो ज्ञानं वैराग्यमैश्वर्यं चेति । एवं स उत्पन्नः सन्नन्धे तमसि[4] मज्जज्जगदालोक्य संसारपारम्पर्येण सत्कारुण्यो जिज्ञासमानाय आसुरिसगोत्राय ब्राह्मणायेदं पञ्चविंशतितत्त्वानां ज्ञानमुक्तवान् । यस्य ज्ञानाद्दुःखक्षयो भवति ।

---

१. वा०-तदपघातके; ज०-तदवघातके ।

२. ब०- ' सनन्दश्चेति पाठान्तरम् '

३. वि०-सहोत्पन्ना ।

४. वि०-सन्नन्धतमसि ।

पञ्चविंशतितत्त्वज्ञो यत्र तत्राश्रमे वसेत्[1] ।
जटी मुण्डी शिखी वापि मुच्यते नात्र संशयः ॥

तदिदमाहुः—**दुःखत्रयाभिघाताज्जिज्ञासेति** । तत्र दुःखत्रयम्—आध्यात्मिकम्, आधिभौतिकम्, आधिदैविकं चेति । तत्राध्यात्मिकं द्विविधम्—शारीरं, मानसं चेति । शारीरं वातपित्तश्लेष्मविपर्ययकृतं ज्वरातीसारादि । मानसं प्रियवियोगाप्रियसंयोगादि । आधिभौतिकं चतुर्विधभूतग्रामनिमित्तं[2] मनुष्यपशुमृगपक्षिसरीसृपदंशमशकयूकामत्कुणमत्स्यमकरग्राहस्थावरेभ्यो जरायुजाण्डजस्वेदजोद्भिज्जेभ्यः सकाशादुपजायते । आधिदैविकम्—देवानामिदं दैवम्[3], दिवः प्रभवतीति वा दैवम् । तदधिकृत्य यदुपजायते—शीतोष्णवातवर्षाशनिपातादिकम् । एवं यथा दुःखत्रयाभिघातात् जिज्ञासा कार्या । क्व—

**तदभिघातके हेतौ** । तस्य दुःखत्रयस्य अभिघातको यो हेतुस्तत्रेति ।

**दृष्टे साऽपार्था चेत्** । दृष्टे हेतौ दुःखत्रयाभिघातके सा जिज्ञासा अपार्था चेद्यदि । तत्राध्यात्मिकस्य द्विविधस्यापि आयुर्वेदशास्त्रक्रियया प्रियसमागमाप्रियपरिहारकटुतिक्तकषायादिक्वाथादिभिः[4] दृष्ट एवाध्यात्मिकोपायः । आधिभौतिकस्य रक्षादिनाऽभिघातो दृष्टः । दृष्टे साऽपार्था चेदेवं मन्यसे—न ।

**एकान्तात्यन्ततोऽभावात्** । यत एकान्ततोऽवश्यं अत्यन्ततो नित्यं दृष्टेन हेतुना अभिघातो न भवति । तस्मादन्यत्र एकान्तात्यन्ताभिघातके हेतौ जिज्ञासा विविदिषा कार्येति ॥ १ ॥

---

यदि दृष्टादन्यत्र[5] जिज्ञासा कार्या, ततोऽपि नैव । यत आनुश्रविको हेतुर्दुःखत्रयाभिघातकः । अनुश्रूयत[6] इत्यनुश्रवः, तत्र भव आनुश्रविकः । स चागमात् सिद्धः । यथा—

अपाम सोमममृता अभूमागन्म ज्योतिरविदाम देवान् ।
किन्नूनमस्मान्[7] कृणवदरातिः[8] किमु धूर्तिरमृतमर्त्यस्य ॥
( अथर्वशिरस् ३. )

---

१. ज०-कुत्राश्रमे रतः ।
२. वि०-चतुर्विधं भूतग्रामनिमित्तम् ।
३. वि०-दैविकम् ।
४. ब०-कटुतिक्तक्वाथादिभिः ।
५. ब०-वि०-दृष्टान्यत्र ।
६. वि०-अनुश्रवति ।
७. ज०-किमस्मान् ।
८. ब०, मा०-तृणवदरातिः ।



कदाचिदिन्द्रादीनां देवानां कल्प आसीत्, कथं वयममृता अभूमेति विचार्य[1] यस्माद्वयमपाम सोमं पीतवन्तः सोमं तस्मादमृता अभूम, अमरा भूतवन्त इत्यर्थः । किं च अगन्म ज्योतिः, गतवन्तो लब्धवन्तो[2] ज्योतिः स्वर्गमिति । अविदाम देवान्, दिव्यान् विदितवन्तः । एवं च किन्नूनमस्मान् कृणवत्[3] अरातिः, नूनं निश्चितं किं अरातिः शत्रुरस्मान् कृणवत्[4] कर्त्तेति । किमु धूर्तिरमृतमर्त्यस्य, धूर्तिर्जरा हिंसा वा किं करिष्यति अमृतमर्त्यस्य । अन्यच्च वेदे श्रूयते आत्यन्तिकं फलं पशुवधेन—'सर्वांल्लोकाञ्जयति मृत्युं तरति पाप्मानं तरति ब्रह्महत्यां तरति यो योऽश्वमेधेन यजते' इति । एकान्तात्यन्तिके[5] एवं[6] वेदोक्ते अपार्थैव जिज्ञासा—इति न । उच्यते—

**दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः ।**
**तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात् ॥ २ ॥**

२ अन्वयः।—आनुश्रविकः ( हेतुः ) दृष्टवत्, स हि अविशुद्धिक्षयातिशययुक्तः । व्यक्ताव्यक्तज्ञविज्ञानात् तद्विपरीतः श्रेयान् ( भवति ) ।

**दृष्टवदानुश्रविक इति** । दृष्टेन तुल्यो दृष्टवत् । योऽसौ[7] आनुश्रविकः कस्मात् स दृष्टवत्[8], यस्मात्—

**अविशुद्धिक्षयातिशययुक्तः** । अविशुद्धियुक्तः पशुघातात् । तथा चोक्तम् ।

षट् शतानि नियुज्यन्ते पशूनां मध्यमेऽहनि ।
अश्वमेधस्य वचनादूनानि पशुभिस्त्रिभिः ॥

यद्यपि श्रुतिस्मृतिविहितो धर्मस्तथापि मिश्रीभावादविशुद्धियुक्त इति । यथा—

बहूनीन्द्रसहस्राणि देवानां च[9] युगे युगे ।
कालेन समतीतानि कालो हि दुरतिक्रमः ॥

एवमिन्द्रादिनाशात् क्षययुक्तः । तथाऽतिशयो विशेषस्तेन युक्तः । विशेषगुणदर्शनादितरस्य दुःखं स्यादिति । एवमानुश्रविकोऽपि हेतुर्दृष्टवत् । कस्तर्हि श्रेयान्—इति चेदुच्यते—

---

१. वि०-विचार्य्यामुं ।
२. वि०-गतवतो लब्धवतो ।
३. ब०-तृणवत् ।
४. ब०-तृणवत्
५. ब०-ऐकान्तात्यन्तिके ।
६. वि०-एव ।
७. वि०-कोऽसौ ।
८. वि०-'दृष्टवत्' इति नास्ति ।
९. ज०-व्यतीतानि ।

**तद्विपरीतः श्रेयान्** । ताभ्यां दृष्टानुश्रविकाभ्यां विपरीतः श्रेयान् प्रशस्यतर इति । अविशुद्धिक्षयातिशयायुक्तत्वात् । स कथमित्याह--

**व्यक्ताव्यक्तज्ञविज्ञानात्** । तत्र व्यक्तं महदादि-बुद्धिरहंकारः, पञ्च तन्मात्राणि, एकादशेन्द्रियाणि, पञ्चमहाभूतानि । अव्यक्तं प्रधानम् । ज्ञः पुरुषः । एवमेतानि पञ्चविंशतिस्तत्त्वानि व्यक्ताव्यक्तज्ञाः[1] कथ्यन्ते । एतद्विज्ञानाच्छ्रेय इति । उक्तं च—'पञ्चविंशतितत्त्वज्ञ' इत्यादि ॥ २ ॥

---

अथ व्यक्ताव्यक्तज्ञानां को विशेष इत्युच्यते—

**मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।**
**षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥ ३ ॥**

**३ अन्वयः।**—मूलप्रकृतिः, अविकृतिः; महदाद्याः सप्त प्रकृतिविकृतयः । षोडशकस्तु विकारः, पुरुषः न प्रकृतिः न ( च ) विकृतिः ।

**मूलप्रकृतिः** प्रधानम् । प्रकृतिविकृतिसप्तकस्य मूलभूतत्वात् । मूलं च सा प्रकृतिश्च मूलप्रकृतिः । अविकृतिः अन्यस्मान्नोत्पद्यते तेन प्रकृतिः कस्यचिद्विकारो न भवति[2] ।

**महदाद्याः प्रकृतिविकृतयः सप्त** । महान्[3] बुद्धिः । बुद्ध्याद्याः सप्त --बुद्धिः १, अहङ्कारः २, पञ्च तन्मात्राणि ७ । एताः[4] सप्त प्रकृतिविकृतयः। तद्यथा—प्रधानाद्बुद्धिरुत्पद्यते तेन विकृतिः प्रधानस्य विकार इति, सैवाहङ्कारमुत्पादयति अतः प्रकृतिः । अहङ्कारोऽपि बुद्धेरुत्पद्यत इति विकृतिः, स च पञ्च तन्मात्राण्युत्पादयतीति प्रकृतिः । तत्र शब्दतन्मात्रमहङ्कारादुत्पद्यत इति विकृतिः, तस्मादाकाशमुत्पद्यत इति प्रकृतिः । तथा स्पर्शतन्मात्रमहङ्कारादुत्पद्यत इति विकृतिः, तदेवं वायुमुत्पादयतीति प्रकृतिः । गन्धतन्मात्रमहङ्कारादुत्पद्यत इति विकृतिः, तदेवं पृथिवीमुत्पादयतीति प्रकृतिः । रूपतन्मात्रमहङ्कारादुत्पद्यत इति विकृतिः, तदेवं तेज उत्पादयतीति प्रकृतिः । रसतन्मात्र-

१. वि०-०व्यक्तज्ञानि ।
२. 'इति अविकृतिः' इत्यपेक्षितम् ।
३. वि०-महाभूतादिति ।
४. वि०-एतानि ।



महङ्कारादुत्पद्यत इति विकृतिः, तदेवं अपः[1] उत्पादयतीति प्रकृतिः । एवं महदाद्याः सप्त प्रकृतयो विकृतयश्च ।

**षोडशकश्च विकारः** । पञ्च बुद्धीन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, एकादशं मनः, पञ्च महाभूतानि—एष षोडशको गणो विकृतिरेव । विकारो विकृतिः ।

**न प्रकृतिर्न विकृतिः पुरुषः ॥ ३ ॥**

---

एवमेषां व्यक्ताव्यक्तज्ञानां त्रयाणां पदार्थानां कैः कियद्भिः प्रमाणैः, केन कस्य वा प्रमाणेन सिद्धिर्भवति । इह लोके प्रमेयवस्तु प्रमाणेन साध्यते, यथा – प्रस्थादिभिर्व्रीहयः, तुलया चन्दनानि । तस्मात् प्रमाणमभिधेयम्—

**दृष्टमनुमानमाप्तवचनं च, सर्वप्रमाणसिद्धत्वात् ।**
**त्रिविधं प्रमाणमिष्टं, प्रमेयसिद्धिः प्रमाणाद्धि ॥ ४ ॥**

**४ अन्वयः** । --सर्वप्रमाणसिद्धत्वात् प्रमाणं 'दृष्टम् अनुमानम् आप्तवचनञ्च' ( इति ) त्रिविधम् इष्टम् । हि प्रमाणात् प्रमेयसिद्धिः ( भवति ) ।

दृष्टं यथा--श्रोत्रं, त्वक्, चक्षुः, जिह्वा, घ्राणमिति पञ्च बुद्धीन्द्रियाणि । शब्दस्पर्शरूपरसगन्धा एषां पञ्चानां पञ्चैव विषया यथासंख्यम् । शब्दं श्रोत्रं गृह्णाति, त्वक् स्पर्शं, चक्षू रूपं, जिह्वा रसं, घ्राणं गन्धमिति । एतद्दृष्टमित्युच्यते प्रमाणम्[2] ।

प्रत्यक्षेणानुमानेन वा योऽर्थो न गृह्यते स आप्तवचनाद्ग्राह्यः । यथा–इन्द्रो देवराजः, उत्तराः कुरवः, स्वर्गेऽप्सरस इत्यादि । प्रत्यक्षानुमानाग्राह्यं अथाप्तवचनाद्[3] गृह्यते । अपि चोक्तम्—

आगमो ह्याप्तवचनं, आप्तं दोषक्षयाद्विदुः ।
क्षीणदोषोऽनृतं वाक्यं न ब्रूयाद्धेत्वसम्भवात् ॥
स्वकर्मण्यभियुक्तो यः सङ्ग[4]-द्वेषविवर्जितः ।
पूजितस्तद्विधैर्नित्यं[5] आप्तो ज्ञेयः स तादृशः ॥

१. वि०-आपः ।
२. अत्रानुमानप्रमाणलक्षणं स्खलितमिवाभाति ।
३. ब०-अप्याप्तवचनाद् ।
४. ज०-राग° ।
५. ज०-निर्वैरः पूजितः सद्भिः ।

एतेषु प्रमाणेषु सर्वप्रमाणानि सिद्धानि भवन्ति। षट् प्रमाणानि जैमिनिः। अथ कानि तानि प्रमाणानि[१]। अर्थापत्तिः, सम्भवः, अभावः, प्रतिभा, ऐतिह्यं, उपमानं चेति षट् प्रमाणानि। तत्रार्थापत्तिर्द्विविधा—दृष्टा श्रुता च। तत्र दृष्टा—एकस्मिन्पक्षे आत्मभावो गृहीतश्चेदन्यस्मिन् अप्यात्मभावो गृह्यत एव। श्रुता यथा—दिवा देवदत्तो न भुंक्ते अथ च पीनो दृश्यते, अतोऽवगम्यते रात्रौ भुंक्त इति। सम्भवो यथा–प्रस्थ इत्युक्ते चत्वारः कुडवाः[२] सम्भाव्यन्ते। अभावो नाम प्रागितरेतरात्यन्तसर्वाभावलक्षणः। प्रागभावो यथा—देवदत्तः कौमारयौवनादिषु। इतरेतराभावः—पटे घटाभावः। अत्यन्ताभावः—खरविषाणवन्ध्यासुतखपुष्पवदिति। सर्वाभावः प्रध्वंसाभावः—दग्धपटवदिति। यथा–शुष्कधान्यदर्शनाद्वृष्टेरभावो गम्यते। एवमभावोऽनेकधा। प्रतिभा यथा–

दक्षिणेन च[३] विन्ध्यस्य सह्यस्य च यदुत्तरम्।
पृथिव्यामासमुद्रायां स प्रदेशो मनोरमः॥

एवमुक्ते तस्मिन् प्रदेशे शोभना गुणाः सन्तीति प्रतिभोत्पद्यते। प्रतिभान्वाससंज्ञानमिति[४]। ऐतिह्यं यथा—ब्रवीति लोको यथात्र वटे यक्षिणी प्रवसतीत्येव ऐतिह्यम्। उपमानं यथा--गौरिव गवयः, समुद्र इव तडागः[५]। एतानि षट् प्रमाणानि त्रिषु दृष्टादिष्वन्तर्भूतानि। तत्रानुमाने तावदर्थापत्तिरन्तर्भूता। सम्भवाभावप्रतिभैतिह्योपमाश्चाप्तवचने।

तस्मात् त्रिष्वेव **सर्वप्रमाणसिद्धत्वात् त्रिविधं प्रमाणमिष्टं** तदाह। तेन त्रिविधेन प्रमाणेन प्रमाणसिद्धिर्भवतीति वाक्यशेषः।

**प्रमेयसिद्धिः प्रमाणाद्धि**। प्रमेयं--प्रधानं, बुद्धिः, अहङ्कारः, पञ्च तन्मात्राणि, एकादशेन्द्रियाणि, पञ्च महाभूतानि, पुरुष इति। एतानि पञ्चविंशतिस्तत्त्वानि व्यक्ताव्यक्तज्ञा इत्युच्यन्ते[६]। तत्र किञ्चित् प्रत्यक्षेण साध्यं, किञ्चिदनुमानेन, किञ्चिदागमेनेति त्रिविधं प्रमाणमुक्तम्॥ ४॥

---

१. वि०–अप्रमाणानि।
२. ज०–कुडपाः, कुडुबाः।
३. मा०–तु; 'च' इति वि०-पुस्तके नास्ति।
४. ब०-प्रतिभा च जानतां ज्ञानमिति।
५. वि०-तडागं।
६. वि०-ज्ञान्युच्यन्ते।



तस्य किं लक्षणमेतदाह--

**प्रतिविषयाध्यवसायो दृष्टं, त्रिविधमनुमानमाख्यातम्।**
**तल्लिङ्गलिङ्गिपूर्वकं, आप्तश्रुतिराप्तवचनं च[१]॥ ५॥**

५ **अन्वयः**।--प्रतिविषयाध्यवसायः दृष्टम्, अनुमानं त्रिविधम् आख्यातं, तत् लिङ्गलिङ्गिपूर्वकम्, आप्तवचनन्तु आप्तश्रुतिः।

प्रतिविषयेषु श्रोत्रादीनां शब्दादिविषयेषु अध्यवसायो दृष्टं प्रत्यक्षमित्यर्थः।

**त्रिविधमनुमानमाख्यातम्**। पूर्ववत्, शेषवत्[२], सामान्यतो दृष्टं चेति। पूर्वमस्यास्तीति पूर्ववद् यथा--मेघोन्नत्या वृष्टिं साधयति पूर्वदृष्टत्वात्[३]। शेषवद्यथा--समुद्रादेकं जलपलं लवणमासाद्य शेषस्याप्यस्ति लवणभाव इति। सामान्यतो दृष्टं–देशाद्देशान्तरं प्राप्तं दृष्टं गतिमच्चन्द्रतारकं, चैत्रवत्। यथा चैत्रनामानं देशाद्देशान्तरं प्राप्तमवलोक्य गतिमानयमिति, तद्वच्चन्द्रतारकमिति। तथा पुष्पिताम्रदर्शनादन्यत्र पुष्पिता आम्रा[४] इति सामान्यतो दृष्टेन साधयति। एतत्सामान्यतो दृष्टम्[५]।

किञ्च **तल्लिङ्गलिङ्गिपूर्वकमिति**। तदनुमानं लिङ्गपूर्वकं यत्र लिङ्गेन लिङ्गी अनुमीयते, यथा--दण्डेन यतिः। लिङ्गिपूर्वकं च यत्र लिङ्गिना लिङ्गमनुमीयते, यथा—दृष्ट्वा यतिं अस्येदं त्रिदण्डमिति।

**आप्तश्रुतिराप्तवचनं** च। आप्ता आचार्या ब्रह्मादयः। श्रुतिर्वेदः। आप्ताश्च श्रुतिश्च आप्तश्रुतिः[६], तदुक्तमाप्तवचनमिति॥ ५॥

---

एवं त्रिविधं प्रमाणमुक्तं, तत्र केन प्रमाणेन किं साध्यमुच्यते--

---

१. विहाय जयमङ्गलामन्ये सर्वे 'तु' इति पठन्ति॥ 'च' इतिपाठस्तु भाष्यसंमतः।
२. वि०- शेषवत् पूर्ववत्।
३. वि०–पूर्ववृष्टित्वात्।
४. वि०–पुष्पिताम्रा।
५. वि०–सामान्यदृष्टम्।
६. ब०–'आर्षत्वादेकवचनं मध्ये सहितशब्दलोपोवेति' इति टिप्पणी। वि०–आप्तश्च श्रुतिश्च आप्तश्रुती।

**सामान्यतस्तु दृष्टादतीन्द्रियाणां प्रसिद्धिरनुमानात्**[1] ।
**तस्मादपि चासिद्धं परोक्षमाप्तागमात् सिद्धम्**[2] ॥ ६ ॥

६ **अन्वयः** ।—अतीन्द्रियाणां तु सामान्यतो दृष्टात् अनुमानात् प्रसिद्धिः । तस्मादपि च असिद्धं परोक्षम् आप्तागमात् सिद्धम् ।

**सामान्यतोदृष्टादनुमानात् अतीन्द्रियाणां**, इन्द्रियाण्यतीत्य वर्तमानानां सिद्धिः । प्रधानपुरुषावतीन्द्रियौ सामान्यतोदृष्टानुमानेन साध्येते यस्मान्महदादि लिङ्गं त्रिगुणम्। यस्येदं त्रिगुणं कार्यं तत्प्रधानमिति। यतश्चाचेतनं चेतनमिवाभाति, अतोऽन्योऽधिष्ठाता पुरुष इति । व्यक्तं प्रत्यक्षसाध्यम् ।

**तस्मादपि चासिद्धं परोक्षमाप्तागमात् सिद्धम्** । यथा—इन्द्रो देवराजः, उत्तराः कुरवः, स्वर्गेऽप्सरस इति परोक्षमाप्तवचनात् सिद्धम् ॥ ६ ॥

---

अत्र कश्चिदाह—प्रधानं[3] पुरुषो वा नोपलभ्यते । यच्च[4] नोपलभ्यते लोके तन्नास्ति । तस्मात्तावपि न स्तः । यथा—द्वितीयं शिरः, तृतीयो बाहुरिति, तदुच्यते—अत्र सतामप्यर्थानामष्टधोपलब्धिर्न भवति । तद्यथा—

**अतिदूरात् सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात् ।**
**सौक्ष्म्याद् व्यवधानादभिभवात् समानाभिहाराच्च** ॥ ७ ॥

७ **अन्वयः** ।—अतिदूरात् ( अति ) सामीप्यात् इन्द्रियघातात् मनोऽनवस्थानात् सौक्ष्म्यात् व्यवधानात् अभिभवात् समानाभिहाराच्च ( सतामपि अनुपलब्धिः ) ।

इह सतामप्यर्थानां **अतिदूरादनुपलब्धिर्दृष्टा** । यथा—देशान्तरस्थानां चैत्रमैत्रविष्णुमित्राणाम् ।

**सामीप्यात्** । यथा—चक्षुषोऽञ्जनानुपलब्धिः ।

**इन्द्रियाभिघातात्** । यथा—बधिरान्धयोः शब्दरूपानुपलब्धिः ।

**मनोऽनवस्थानात्** । यथा—व्यग्रचित्तः सम्यक्कथितमपि नावधारयति ।

**सौक्ष्म्यात्** । यथा—धूमोष्मजलनीहारपरमाणवो गगनगता नोपलभ्यन्ते ।

---

१. विहाय जयमङ्गलाटिप्पणीं ' प्रतीतिरनुमानात् ' इति सर्वसम्मतः पाठः ।
२. मा०-साध्यम् ।
३. वि०-प्रधानः ।
४. वि०-यश्च ।



**व्यवधानात्** । यथा—कुड्येन पिहितं वस्तु नोपलभ्यते ।

**अभिभवात्** । यथा—सूर्यतेजसाभिभूता ग्रहनक्षत्रतारकादयो नोपलभ्यन्ते।

**समानाभिहारात्** । यथा—मुद्गराशौ मुद्गः क्षिप्तः, कुवलयामलकमध्ये कुवलयामलके क्षिप्ते, कपोतमध्ये कपोतो नोपलभ्यन्ते, समानद्रव्यमध्याहृतत्वात् । एवमष्टधाऽनुपलब्धिः सतामर्थानामिह दृष्टा ॥ ७ ॥

---

एवं चास्ति किमभ्युपगम्यते, प्रधानपुरुषयोरप्येतयोर्वा अनुपलब्धिः केन हेतुना, केन चोपलब्धिस्तदुच्यते—

**सौक्ष्म्यात्तदनुपलब्धिर्नाभावात्, कार्यतस्तदुपलब्धिः**[1] ।
**महदादि तच्च कार्यं, प्रकृतिविरूपं सरूपं च**[2] ॥ ८ ॥

८ **अन्वयः** ।—तदनुपलब्धिः सौक्ष्म्यात्, अभावात् न । कार्य्यतः तदुपलब्धिः । तच्च कार्य्यं महदादि प्रकृतिविरूपं सरूपञ्च ।

**सौक्ष्म्यात्तदनुपलब्धिः** । प्रधानस्येत्यर्थः । प्रधानं सौक्ष्म्यान्नोपलभ्यते । यथा—आकाशे धूमोष्मजलनीहारपरमाणवः सन्तोऽपि नोपलभ्यन्ते । कथं तर्हि तदुपलब्धिः—

**कार्यतस्तदुपलब्धिः** । कार्यं दृष्ट्वा कारणमनुमीयते । अस्ति प्रधानं कारणं यस्येदं कार्यम् । बुद्धिरहङ्कारपञ्चतन्मात्राणि एकादशेन्द्रियाणि पञ्च महाभूतान्येव तत्कार्यम् ।

**तच्च कार्यं प्रकृतिविरूपम्** । प्रकृतिः प्रधानं तस्य विरूपं प्रकृतेरसदृशम् ।

**सरूपं च** । समानरूपं च । यथा—लोकेऽपि पितुस्तुल्य इव पुत्रो भवत्यतुल्यश्च । येन हेतुना तुल्यमतुल्यं तदुपरिष्टाद्वक्ष्यामः ॥ ८ ॥

---

यदिदं महदादि कार्यं तत्किं प्रधाने सत् उताहोस्वित् असत्—आचार्यविप्रतिपत्तेरयं संशयः । यतोऽत्र सांख्यदर्शने सत्कार्यं, बौद्धादीनामसत्कार्यम् । यदि सत्—असन्न भवति, अथासत्—सन्न भवतीति विप्रतिषेधस्तत्राह—

---

१. ' °लब्धेः ' इत्यन्येषां सर्वेषां पाठः ।
२. अन्येतु ' प्रकृतिसरूपं विरूपं च ' इति पठन्ति ।

**असदकरणादुपादानग्रहणात्, सर्वसम्भवाभावात् ।**
**शक्तस्य शक्यकरणात्, कारणभावाच्च, सत्कार्यम् ॥ ९ ॥**

९ **अन्वयः** ।– असदकरणात् उपादानग्रहणात् सर्वसम्भवाभावात् शक्तस्य शक्यकरणात् कारणभावाच्च कार्यं सत् ।

**असदकरणात्** । न सत् असत् । असतोऽकरणं, तस्मात् सत्कार्यम् । इह लोके असत्करणं नास्ति । यथा––सिकताभ्यस्तैलोत्पत्तिः । तस्मात्सतः करणादस्ति प्रागुत्पत्तेः[1] प्रधाने व्यक्तम् । अतः सत्कार्यम् ।

किं चान्यत्––**उपादानग्रहणात्** । उपादानं कारणं, तस्य ग्रहणात् । इह लोके यो येनार्थी स तदुपादानग्रहणं करोति––दध्यर्थी क्षीरस्य, न तु जलस्य । तस्मात्सत्कार्यम् ।

इतश्च, **सर्वसम्भवाभावात्** । सर्वस्य सर्वत्र सम्भवो नास्ति । यथा–– सुवर्णस्य रजतादौ तृणपांशुसिकतासु । तस्मात्सर्वसम्भवाभावात्सत्कार्यम् ।

इतश्च, **शक्तस्य शक्यकरणात्** । इह कुलालः शक्तो मृद्दण्डचक्रचीवररज्जुनीरादिकरणोपकरणं वा शक्यमेव घटं मृत्पिण्डादुत्पादयति । तस्मात्सत्कार्यम् ।

इतश्च, **कारणभावाच्च सत्कार्यम्** । कारणं यल्लक्षणं तल्लक्षणमेव कार्यमपि[2] । यथा––यवेभ्यो[3] यवाः, व्रीहिभ्यो व्रीहयः । यदाऽसत्कार्यं स्यात्ततः कोद्रवेभ्यः शालयः स्युः । न च सन्तीति तस्मात् सत्कार्यम् । एवं पञ्चभिर्हेतुभिः प्रधाने महदादि लिङ्गमस्ति । तस्मात् सत उत्पत्तिः, नासत इति ॥ ९ ॥

---

प्रकृतिविरूपं सरूपं च यदुक्तं तत् कथमित्युच्यते––

**हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम् ।**
**सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम् ॥ १० ॥**

१० **अन्वयः** ।––व्यक्तं हेतुमत् अनित्यम् अव्यापि सक्रियम् अनेकम् आश्रितं लिङ्गं सावयवं परतन्त्रं ( च ) । अव्यक्तं विपरीतम् ।

व्यक्तं महदादिकार्यं **हेतुमदिति** । हेतुरस्यास्तीति हेतुमत् । उपादानं हेतुः, कारणं, निमित्तमिति पर्य्यायाः । व्यक्तस्य प्रधानं हेतुरस्ति, अतो हेतुम-

१. वि०–प्रागुभे ।
२. वि०–कार्यमेव ।
३. वि०–यवेभ्योऽपि ।



द्व्यक्तं भूतपर्यन्तम् । हेतुमद्बुद्धितत्त्वं प्रधानेन, हेतुमानहङ्कारो बुद्ध्या, पञ्च तन्मात्राणि एकादशेन्द्रियाणि हेतुमन्त्यहंकारेण, आकाशं शब्दतन्मात्रेण हेतुमत्, वायुः स्पर्शतन्मात्रेण हेतुमान्, तेजो रूपतन्मात्रेण हेतुमत्, आपो रसतन्मात्रेण हेतुमत्यः, पृथिवी गन्धतन्मात्रेण हेतुमती । एवं भूतपर्यन्तं व्यक्तं हेतुमत् ।

किं चान्यत्, **अनित्यम्** । यस्मादन्यस्मादुत्पद्यते, यथा–मृत्पिण्डादुत्पद्यते घटः स चानित्यः ।

किं च, **अव्यापि** । असर्वगमित्यर्थः । यथा प्रधानपुरुषौ सर्वगतौ, नैवं व्यक्तम् ।

किं चान्यत्, **सक्रियम्** । संसारकाले संसरति, त्रयोदशविधेन करणेन संयुक्तं सूक्ष्मं शरीरमाश्रित्य संसरति, तस्मात् सक्रियम् ।

किं चान्यत्, **अनेकम्** । बुद्धिरहङ्कारः पञ्च तन्मात्राण्येकादशेन्द्रियाणि[1] पञ्चमहाभूतानि चेति[2] ।

( किं चान्यत्, **आश्रितम्** । स्वकारणमाश्रयते । प्रधानाश्रिता बुद्धिः, बुद्धिमाश्रितोऽहङ्कारः, अहङ्काराश्रितानि एकादशेन्द्रियाणि पञ्च तन्मात्राणि, पञ्चतन्मात्राश्रितानि पञ्चमहाभूतानीति । )[3]

किं च, **लिङ्गम्** । लययुक्तम् । लयकाले पञ्च महाभूतानि तन्मात्रेषु लीयन्ते, तान्येकादशेन्द्रियैः सहाहङ्कारे, स च बुद्धौ, सा च प्रधाने लयं यातीति ।

तथा, **सावयवम्** । अवयवाः शब्दस्पर्शरसरूपगन्धाः, तैः सह ।

किं च, **परतन्त्रम्** । नात्मनः प्रभवति । यथा–प्रधानतन्त्रा बुद्धिः, बुद्धितन्त्रोऽहङ्कारः, अहङ्कारतन्त्राणि तन्मात्राणीन्द्रियाणि च, तन्मात्रतन्त्राणि पञ्चमहाभूतानि च । एवं परतन्त्रं परायत्तं व्याख्यातं व्यक्तम् ।

अथोऽव्यक्तं व्याख्यास्यामः । **विपरीतमव्यक्तम्** । एतैरेव गुणैर्यथोक्तैर्विपरीतमव्यक्तम् । हेतुमद् व्यक्तमुक्तम् । नहि प्रधानात् परं किञ्चिदस्ति, यतः प्रधानस्यानुत्पत्तिः, तस्मादहेतुमदव्यक्तम् ।

---

१. वि०–°याणि च
२. 'चेति' इति वि०-पुस्तके नास्ति ।
३. धनुश्चिह्नाङ्कितः पाठः केवलं ब०-पुस्तके लभ्यते । वि०-पुस्तके तु 'तन्मात्राश्रितानि' इत्येवोपलभ्यते । अक्षरमर्यादया चैष पाठः वि०-पुस्तके स्खलित इति भाति ।

तथा अनित्यं च व्यक्तं, नित्यमव्यक्तं, अनुत्पद्यमानत्वात् । नहि भूतानीव[1] कुतश्चिदुत्पद्यत इति नित्यं प्रधानम्[2] ।

किं च, अव्यापि व्यक्तं, व्यापि प्रधानं, सर्वगतत्वात् ।

सक्रियं व्यक्तं, अक्रियमव्यक्तं, सर्वगतत्वादेव ।

तथा अनेकं व्यक्तं, एकं प्रधानं, कारणत्वात् । त्रयाणां लोकानां प्रधानमेकं कारणं, तस्मादेकं प्रधानम् ।

तथा आश्रितं व्यक्तं, अनाश्रितमव्यक्तं, अकार्यत्वात् । नहि प्रधानादस्ति किञ्चित्परं यस्य प्रधानं कार्यं स्यात् ।

तथा व्यक्तं लिङ्गं, अलिङ्गमव्यक्तं, नित्यत्वात् । महदादि लिङ्गं प्रलयकाले परस्परं प्रलीयते, नैवं प्रधानं, तस्मादलिङ्गं प्रधानम् ।

तथा सावयवं व्यक्तं, निरवयवमव्यक्तं, नहि शब्दस्पर्शरसरूपगन्धाः प्रधाने सन्ति ।

तथा परतन्त्रं व्यक्तं, स्वतन्त्रमव्यक्तं, प्रभवत्यात्मनः ॥ १० ॥

---

एवं व्यक्ताव्यक्तयोर्वैधर्म्यमुक्तं साधर्म्यमुच्यते । यदुक्तं स्वरूपं च—

**त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि ।**
**व्यक्तं तथा प्रधानं, तद्विपरीतस्तथा च पुमान् ॥ ११ ॥**

**११ अन्वयः** । — व्यक्तं तथा प्रधानं त्रिगुणम् अविवेकि विषयः सामान्यम् अचेतनं प्रसवधर्मि । पुमान् तद्विपरीतः तथा च ।

**त्रिगुणं** व्यक्तम् । सत्त्वरजस्तमांसि त्रयो गुणा यस्येति ।

**अविवेकि** व्यक्तम् । न विवेकोऽस्यास्तीति । इदं व्यक्तमिमे गुणा इति न विवेकं[3] कर्तुं याति, अयं गौरयमश्व इति यथा । ये गुणास्तद्व्यक्तं, यद्व्यक्तं ते च गुणा इति ।

तथा **विषयो** व्यक्तम् । भोज्यमित्यर्थः । सर्वपुरुषाणां विषयभूतत्वात् ।

---

१. वि०-भूतानि ।

२. मदीयः पाठः । वि०-°दुत्पद्यन्तेति प्रधानम् । ब०-°दुत्पद्यत इत्यव्यक्तं प्रधानम् ।

३. ब०-इत्यस्य पाठः । वि०-विवक । 'विवेकः' इति पठनीयम् ?



तथा सामान्यं व्यक्तम् । मूल्यदासीवत्[1] सर्वसाधारणत्वात् ।

**अचेतनं** व्यक्तम् । सुखदुःखमोहान्न चेतयतीत्यर्थः ।

तथा **प्रसवधर्मि** व्यक्तम् । तद्यथा—बुद्धेरहङ्कारः प्रसूयते, तस्मात् पञ्च तन्मात्राणि एकादशेन्द्रियाणि च प्रसूयन्ते, तन्मात्रेभ्यः पञ्च महाभूतानि ।

एवमेते व्यक्तधर्माः प्रसवधर्मान्ता उक्ताः, एवमेभिरव्यक्तं सरूपं, यथा **व्यक्तं तथा प्रधानमिति** । तत्र त्रिगुणं व्यक्तं, अव्यक्तमपि त्रिगुणं, यस्यैतन्महदादि कार्यं त्रिगुणम् । इह यदात्मकं कारणं तदात्मकं कार्यमिति । यथा कृष्णतन्तुकृतः कृष्ण एव पटो भवति ।

तथा अविवेकि व्यक्तं, प्रधानमपि गुणैर्न भिद्यते । अन्ये गुणा अन्यत् प्रधानमेवं विवेक्तुं[2] न याति, तदविवेकि प्रधानम् ।

तथा विषयो व्यक्तं, प्रधानमपि सर्वपुरुषविषयभूतत्वाद्विषय इति ।

तथा सामान्यं व्यक्तं, प्रधानमपि, सर्वसाधारणत्वात् ।

तथा अचेतनं, व्यक्तं, प्रधानमपि सुखदुःखमोहान्न चेतयति, इति कथमनुमीयते—इह ह्यचेतनान्मृत्पिण्डादचेतनो घट उत्पद्यते ।

एवं प्रधानमपि व्याख्यातम् । इदानीं **तद्विपरीतस्तथा च[3] पुमानि**त्येतद्व्याख्यायते । तद्विपरीतस्ताभ्यां व्यक्ताव्यक्ताभ्यां विपरीतः पुमान् । तद्यथा—

त्रिगुणं व्यक्तमव्यक्तं च, अगुणः पुरुषः ।
अविवेकि व्यक्तमव्यक्तं च, विवेकी पुरुषः ।
तथा विषयो व्यक्तमव्यक्तं च, अविषयः पुरुषः ।
तथा सामान्यं व्यक्तमव्यक्तं च, असामान्यः पुरुषः ।

अचेतनं व्यक्तमव्यक्तं च, चेतनः पुरुषः । सुखदुःखमोहान् चेतयति संजानीते तस्माच्चेतनः पुरुषः ।

प्रसवधर्मि व्यक्तं प्रधानं च, अप्रसवधर्मी पुरुषः । नहि पुरुषात् किञ्चित् प्रसूयते । तस्मादुक्तं तद्विपरीतः पुमानिति ।

---

१. जयमङ्गलायां मल्लदासी शब्दो व्यवहृतः ।

२. मदीयः पाठः । ब०-, वि०-विवक्तुं ।

३. 'च' इति वि०-पुस्तके नास्ति ।

तदुक्तं **तथा च पुमानिति** । तत् पूर्वस्यामार्यायां प्रधानमहेतुमद्यथा व्याख्यातं तथा च पुमान् । तद्यथा हेतुमदनित्यमित्यादि व्यक्तं, तद्विपरीतमव्यक्तम् ।

तत्र--हेतुमद्व्यक्तं, अहेतुमत् प्रधानं, तथा च पुमानहेतुमाननुत्पाद्यत्वात् ।

अनित्यं व्यक्तं, नित्यं प्रधानं, तथा च नित्यः पुमान् ।

( अव्यापि व्यक्तं, व्यापि प्रधानं, तथा च व्यापि पुमान् । सर्वगतत्वात् । )[1]

( सक्रियं व्यक्तं, अक्रियं प्रधानं, तथा च पुमान् )[2] अक्रियः, सर्वगतत्वादेव ।

अनेकं व्यक्तं, एकमव्यक्तं, तथा पुमानप्येकः ।

आश्रितं व्यक्तं, अनाश्रितमव्यक्तं, तथा च पुमाननाश्रितः ।

लिङ्गं व्यक्तं, अलिङ्गं प्रधानं, तथा च पुमानप्यलिङ्गः । न क्वचिल्लीयत इति ।

सावयवं व्यक्तं, निरवयवं अव्यक्तं, तथा च पुमान् निरवयवः । नहि पुरुषे शब्दादयोऽवयवाः सन्ति ।

किं च परतन्त्रं व्यक्तं, स्वतन्त्रमव्यक्तं, तथा च पुमानपि स्वतन्त्रः, आत्मनः प्रभवतीत्यर्थः ।

एवमेतदव्यक्तपुरुषयोः साधर्म्यं व्याख्यातं पूर्वस्यामार्यायाम् । व्यक्तप्रधानयोः साधर्म्यं पुरुषस्य वैधर्म्यं च त्रिगुणमविवेकीत्यादि प्रकृतार्यायां व्याख्यातम् ॥ ११ ॥

---

तत्र यदुक्तं त्रिगुणमिति व्यक्तमव्यक्तं च, तत् के ते गुणा इति तत्स्वरूपप्रतिपादनायेदमाह—

**प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः ।**
**अन्योऽन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः ॥ १२ ॥**

---

१. धनुश्चिह्नाङ्कितं केवलं ब०-पुस्तक उपलभ्यते ।
२. धनुश्चिह्नाङ्कितं केवलं ब०-पुस्तक उपलभ्यते ।



**१२ अन्वयः** ।--गुणाः प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च ।

प्रीत्यात्मकाः, अप्रीत्यात्मकाः, विषादात्मकाश्च **गुणाः**-सत्त्वरजस्तमांसीत्यर्थः । तत्र प्रीत्यात्मकं सत्त्वं, **प्रीतिः** सुखं तदात्मकमिति । अप्रीत्यात्मकं रजः, **अप्रीतिर्दुःखम्**[1] । विषादात्मकं तमः, **विषादो** मोहः ।

तथा--**प्रकाशप्रवृत्तिनियमार्थाः** । अर्थशब्दः[2] सामर्थ्यवाची, प्रकाशार्थं सत्त्वं प्रकाशसमर्थमित्यर्थः । प्रवृत्त्यर्थं रजः । नियमार्थं तमः, स्थितौ समर्थमित्यर्थः । प्रकाशक्रियास्थितिशीला गुणा इति ।

तथा--**अन्योऽन्याभिभवाश्रयजननमिथुनवृत्तयश्च** । अन्योऽन्याभिभवाः, अन्योऽन्याश्रयाः, अन्योऽन्यजननाः, अन्योऽन्यमिथुनाः, अन्योऽन्यवृत्तयश्च ते तथोक्ताः । अन्योऽन्याभिभवा इति । अन्योऽन्यं परस्परमभिभवन्तीति प्रीत्यप्रीत्यादिभिर्धर्मैराविर्भवन्ति । यथा--यदा सत्त्वमुत्कटं भवति, तदा रजस्तमसी अभिभूय स्वगुणैः, प्रीतिप्रकाशात्मना[3] अवतिष्ठते; यदा रजः, तदा सत्त्वतमसी अप्रीतिप्रवृत्तिधर्मेण; यदा तमः, तदा सत्त्वरजसी विषादस्थित्यात्मकेन इति । तथा अन्योऽन्याश्रयाश्च द्व्यणुकवद् गुणाः । अन्योऽन्यजननाः, यथा मृत्पिण्डो घटं जनयति । तथा अन्योऽन्यमिथुनाश्च । यथा स्त्रीपुंसौ अन्योऽन्यमिथुनौ तथा गुणाः । उक्तं च—

रजसो मिथुनं सत्त्वं सत्त्वस्य मिथुनं रजः ।
उभयोः सत्त्वरजसोर्मिथुनं तम उच्यते ॥

[ देवीभागवत--३-८ ]

परस्परसहाया इत्यर्थः । अन्योऽन्यवृत्तयश्च । परस्परं वर्तन्ते । 'गुणा गुणेषु वर्त्तन्ते' इति वचनात् [भगवद्गीता--३-२८] । यथा सुरूपा सुशीला स्त्री सर्वसुखहेतुः, सपत्नीनां सैव दुःखहेतुः, सैव रागिणां मोहं जनयति, एवं सत्त्वं रजस्तमसोर्वृत्तिहेतुः । यथा राजा सदोद्युक्तः प्रजापालने दुष्टनिग्रहे, शिष्टानां सुखमुत्पादयति दुष्टानां दुःखं मोहं च, एवं रजः सत्त्वतमसोर्वृत्तिं जनयति । तथा तमः स्वरूपेणावरणात्मकेन सत्त्वरजसोर्वृत्तिं जनयति । यथा मेघाः खमावृत्य

---

१. एतत् वि०-पुस्तके नास्ति ।
२. वि०-अर्थः शब्दः ।
३. वि०-°प्रकाशात्मकेना° ।

जगतः सुखमुत्पादयन्ति, ते वृष्ट्या कर्षकाणां कर्षणोद्योगं जनयन्ति, विरहिणां मोहम् । एवं अन्योऽन्यवृत्तयो गुणाः ॥ १२ ॥

---

किं चान्यत्--

**सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः ।**
**गुरु वरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः ॥ १३ ॥**

१३ अन्वयः ।--सत्त्वं लघु प्रकाशकं (च) इष्टम्, रजः उपष्टम्भकं चलञ्च इष्टम् । तमः गुरु वरणकमेव इष्टम् । प्रदीपवत्तच्च अर्थतः वृत्तिः (इष्टा) ।

**सत्त्वं लघु प्रकाशकं च** । यदा सत्त्वमुत्कटं भवति तदा लघून्यङ्गानि बुद्धिप्रकाशश्च प्रसन्नतेन्द्रियाणां भवति ।

**उपष्टम्भकं चलं च रजः** । उपष्टभ्नातीत्युपष्टम्भकम्, उद्योतकम् । यथा वृषो वृषदर्शने उत्कटमुपष्टम्भं करोति, एवं[1] रजोवृत्तिः । तथा रजश्च चलं दृष्टं, रजोवृत्तिश्चलचित्तो भवति ।

**गुरु वरणकमेव तमः** । यदा तम उत्कटं भवति तदा गुरूण्यङ्गानि आवृतानीन्द्रियाणि भवन्ति स्वार्थासमर्थानि ।

अत्राह--यदि गुणाः परस्परं विरुद्धाः स्वमतेनैव कमर्थं[2] निष्पादयन्ति तर्हि कथम्-**प्रदीपवच्चार्थतो वृत्तिः** । प्रदीपेन तुल्यं प्रदीपवत् । अर्थतः साधना वृत्तिरिष्टा । यथा प्रदीपः परस्परविरुद्धतैलाग्निवर्त्तिसंयोगात् अर्थप्रकाशान्[3] जनयति, एवं सत्त्वरजस्तमांसि परस्परविरुद्धानि अर्थं निष्पादयन्ति ॥ १३ ॥

---

अन्तरप्रश्नो भवति-- 'त्रिगुणमविवेकि विषयः' इत्यादि[4] प्रधानं व्यक्तं च व्याख्यातम् । तत्र प्रधानं, उपलभ्यमानं महदादि च त्रिगुणमविवेक्यादीति च कथमवगम्यते । तत्राह--

१. वि०-एव ।
२. 'स्वमतेनैव एकमर्थं' इति पठनीयम् ?
३. वि० °प्रकाशां । °प्रकाशं-- इति पठनीयम् ?
४. ब०-इत्यादिना ।



**अविवेक्यादिः सिद्धः[1] त्रैगुण्यात्तद्विपर्ययाभावात् ।**
**कारणगुणात्मकत्वात् कार्यस्याव्यक्तमपि सिद्धम् ॥ १४ ॥**

१४ अन्वयः ।-- त्रैगुण्यात् अविवेक्यादिः सिद्धः । तद्विपर्ययाभावात् कार्यस्य कारणगुणात्मकत्वात् अव्यक्तमपि सिद्धम् ।

योऽयमविवेक्यादिर्गुणः स त्रैगुण्यान्महदादौ, अव्यक्ते[2] नायं सिद्ध्यति । अत्रोच्यते-- **तद्विपर्ययाभावात्** । तस्य विपर्ययः तद्विपर्ययः, तस्याभावः तद्विपर्ययाभावः, तस्मात् सिद्धमव्यक्तम् । यथा--यत्रैव तन्तवस्तत्रैव पटः । अन्ये तन्तवोऽन्यः पटो न, कुतः--तद्विपर्ययाभावात् । एवं व्यक्ताव्यक्तसंपन्नो[3] भवति । दूरं प्रधानमासन्नं व्यक्तम् । यो व्यक्तं पश्यति, स प्रधानमपि पश्यति, तद्विपर्ययाभावात् ।

इतश्चाव्यक्तं सिद्धम्--**कारणगुणात्मकत्वात् कार्यस्य** । लोके यदात्मकं कारणं तदात्मकं कार्यमपि । तथा--कृष्णेभ्यस्तन्तुभ्यः कृष्ण एव पटो भवति । एवं महदादि लिङ्गं अविवेकि, विषयः, सामान्यं, अचेतनं, प्रसवधर्मि । यदात्मकं लिङ्गं तदात्मकमव्यक्तमपि सिद्धम् ॥ १४ ॥

---

त्रैगुण्यादविवेक्यादिर्व्यक्ते सिद्धः । तद्विपर्ययाभावात्, एवं कारणगुणात्मकत्वात् कार्यस्य, अव्यक्तमपि सिद्धम्--इत्येतन्मिथ्या, लोके यन्नोपलभ्यते तन्नास्ति--( इति न वाच्यम्, सतोऽपि पाषाणगन्धादेरनुपलम्भात्[4] । ) एवं प्रधानमप्यस्ति किन्तु नोपलभ्यते ।

**भेदानां परिमाणात्, समन्वयात्, शक्तितः[5] प्रवृत्तेश्च ।**
**कारणकार्यविभागात्, अविभागाद्वैश्वरूप्यस्य ॥ १५ ॥**

१५ अन्वयः ।-- भेदानां परिमाणात् समन्वयात् शक्तितः प्रवृत्तेः कारणकार्यविभागात् वैश्वरूप्यस्य अविभागाच्च ( अव्यक्तं कारणं अस्ति ) ।

१. वा०-देः सिद्धिः ।
२. ब०-व्यक्तेः ।
३. मा०- °सम्बन्धो ।
४. धनुश्चिह्नाङ्कितं वि०-पुस्तके नास्ति ।
५. यत्तु वा०-पुस्तके 'कार्यतः' इति पाठदर्शनं, तत् 'शक्तितः' इति वाचस्पत्युद्धृतप्रतीकविरोधाद्भ्रममूलकमिवाभाति ।

कारणमस्त्यव्यक्तमिति क्रियाकारकसम्बन्धः । **भेदानां परिमाणात्** । लोके यत्र कर्तास्ति तस्य परिमाणं दृष्टम् । यथा--कुलाल: परिमितैर्मृत्पिण्डैः परिमितानेव घटान् करोति । एवं महदपि । महदादि लिङ्गं परिमितं भेदतः प्रधानकार्यम् । एका बुद्धिः, एकोऽहङ्कारः, पञ्च तन्मात्राणि, एकादशेन्द्रियाणि, पञ्च महाभूतानि--इत्येवं भेदानां परिमाणादस्ति प्रधानं कारणं यद्व्यक्तं परिमितमुत्पादयति । यदि प्रधानं न स्यात्तदा निष्परिमाणमिदं व्यक्तमपि[1] स्यात् । परिमाणाच्च भेदानामस्ति प्रधानं यस्माद् व्यक्तमुत्पन्नम् ।

तथा **समन्वयात्** । इह लोके प्रसिद्धिर्दृष्टा यथा--व्रतधारिणं बटुं दृष्ट्वा समन्वयति, नूनमस्य पितरौ ब्राह्मणाविति । एवमिदं त्रिगुणं महदादिलिङ्गं दृष्ट्वा साधयामोऽस्य यत्कारणं भविष्यतीति । अतः समन्वयादस्ति प्रधानम् ।

तथा **शक्तितः प्रवृत्तेश्च** । इह यो यस्मिन् शक्तः स तस्मिन्नेवार्थे प्रवर्तते । यथा----कुलालो घटस्य करणे समर्थो घटमेव करोति न पटं रथं वा ।

तथा अस्ति प्रधानं कारणं, कुतः--**कारणकार्यविभागात्** । करोतीति कारणम्, क्रियत इति कार्यम् । कारणस्य कार्यस्य च विभागः । यथा घटो दधिमधूदकपयसां धारणे समर्थो, न तथा मृत्पिण्डः । मृत्पिण्डो वा घटं निष्पादयति, न चैवं घटो मृत्पिण्डम् । एवं महदादिलिङ्गं दृष्ट्वानुमीयते—अस्ति विभक्तं तत् कारणं यस्य विभाग इदं व्यक्तमिति ।

इतश्च, **अविभागाद्वैश्वरूप्यस्य** । विश्वं जगत्, तस्य रूपं व्यक्तिः विश्वरूपस्य भावो वैश्वरूप्यम् । तस्य अविभागादस्ति प्रधानम्, यस्मात् त्रैलोक्यस्य पञ्चानां पृथिव्यादीनां महाभूतानां परस्परं विभागो नास्ति, महाभूतेष्वन्तर्भूतास्त्रयो लोका इति । पृथिव्यापस्तेजोवायुराकाशमिति एतानि पञ्च महाभूतानि प्रलयकाले सृष्टिक्रमेणैवाविभागं यान्ति तन्मात्रेषु परिणामिषु, तन्मात्राण्येकादशेन्द्रियाणि चाहङ्कारे, अहङ्कारो बुद्धौ, बुद्धिः प्रधाने । एवं त्रयो लोकाः प्रलयकाले प्रकृतावविभागं गच्छन्ति । तस्मादविभागात् क्षीरदधिवद्व्यक्ताव्यक्तयोरस्त्यव्यक्तं[2] कारणम् ॥ १५ ॥

१. माठरसम्मतः पाठः । ब०- पाठः, स च भ्रमात्मक इति स्फुटमेव । वि०-पुस्तकयोस्तु ' न स्यात् ' इति २. वि०-°योरव्यक्तं° ।



अतश्च--

**कारणमस्त्यव्यक्तं प्रवर्तते त्रिगुणतः समुदयाच्च ।**
**परिणामतः सलिलवत् प्रतिप्रतिगुणाश्रयविशेषात् ॥ १६ ॥**

**१६ अन्वयः** ।– अव्यक्तं कारणम् अस्ति ( यतः ) त्रिगुणतः समुदयाच्च सलिलवत् प्रतिप्रतिगुणाश्रयविशेषात् परिणामतः ( महदादि ) प्रवर्तते ।

**अव्यक्तं** प्रख्यातं कारणमस्ति यस्मान्महदादि लिङ्गं प्रवर्तते ।

**त्रिगुणतः** त्रिगुणात् । सत्त्वरजस्तमोगुणाः यस्मिंस्तत् त्रिगुणं, तत्किमुक्तं भवति--सत्त्वरजस्तमसां साम्यावस्था प्रधानम् ।

तथा **समुदयात्** । यथा गङ्गास्रोतांसि त्रीणि रुद्रमूर्द्धनि पतितानि एकं स्रोतो जनयन्ति एवं त्रिगुणमव्यक्तमेकं व्यक्तं जनयति । यथा[1] वा तन्तवः समुदिताः पटं जनयन्ति, एवमव्यक्तं गुणसमुदयान्महदादि जनयतीति त्रिगुणतः समुदयाच्च व्यक्तं जगत् प्रवर्तते ।

यस्मादेकस्मात् प्रधानाद्व्यक्तं तस्मादेकरूपेण भवितव्यम्-नैष दोषः **परिणामतः सलिलवत् प्रतिप्रतिगुणाश्रयविशेषात्** । एकस्मात् प्रधानात् त्रयो लोकाः समुत्पन्नाः तुल्यभावा न भवन्ति । देवाः सुखेन युक्ताः, मनुष्या दुःखेन, तिर्यञ्चो मोहेन । एकस्मात् प्रधानात् प्रवृत्तं व्यक्तं प्रतिप्रतिगुणाश्रयविशेषात् परिणामतः सलिलवद्भवति । प्रतिप्रतीति वीप्सा । गुणानामाश्रयो गुणाश्रयः, तद्विशेषः, तं गुणाश्रयविशेषं प्रतिनिधाय प्रतिप्रतिगुणाश्रयविशेषं परिणामात् प्रवर्तते व्यक्तम् । यथा--आकाशादेकरसं सलिलं पतितं नानारूपात् संश्लेषाद्भिद्यते तत्तद्रसान्तरैः[2], एवमेकस्मात् प्रधानात् प्रवृत्तास्त्रयो लोका नैकस्वभावा भवन्ति । देवेषु सत्त्वमुत्कटं, रजस्तमसी उदासीने, तेन तेऽत्यन्तसुखिनः । मनुष्येषु रज उत्कटं भवति, सत्त्वतमसी उदासीने, तेन तेऽत्यन्तदुःखिनः । तिर्यक्षु तम उत्कटं भवति, सत्त्वरजसी उदासीने, तेन तेऽत्यन्तमूढाः ॥ १६ ॥

१ वि०— तथा । २ वि०-तद्रसान्तरैः ।

एवमार्याद्वयेन प्रधानस्यास्तित्वमभ्युपगम्यते, इतश्चोत्तरं पुरुषास्तित्वप्रतिपादनार्थमाह--

**संघातपरार्थत्वात्[1] त्रिगुणादिविपर्ययादधिष्ठानात् ।**
**पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थं[2] प्रवृत्तेश्च ॥ १७ ॥**

**१७ अन्वयः ।** — संघातपरार्थत्वात् त्रिगुणादिविपर्ययात् अधिष्ठानात् भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च पुरुषोऽस्ति ।

यदुक्तं व्यक्ताव्यक्तज्ञविज्ञानात्[3] मोक्षः प्राप्यत इति, तत्र व्यक्तादनन्तरं अव्यक्तं पञ्चभिः कारणैरधिगतम् । अव्यक्तवत् पुरुषोऽपि सूक्ष्मः, तस्याधुनाऽनुमितास्तित्वं प्रतिक्रियते । अस्ति पुरुषः, कस्मात्--**संघातपरार्थत्वात्** । योऽयं महदादिसंघातः स पुरुषार्थः, इत्यनुमीयते, अचेतनत्वात् पर्यङ्कवत् । यथा पर्यङ्कः प्रत्येकं गात्रोत्पलकपादपीठ[4]तूलीप्रच्छादनपटोपधानसंघातः परार्थो नहि स्वार्थः । पर्यङ्कस्य नहि किञ्चिदपि गात्रोत्पलाद्यवयवानां परस्परं कृत्यमस्ति । अतोऽवगम्यते, अस्ति पुरुषो यः पर्यङ्के शेते यस्यार्थं पर्यङ्कः । तत्परार्थमिदं शरीरं पञ्चानां महाभूतानां संघातो वर्तते । अस्ति पुरुषो यस्येदं भोग्यं शरीरं भोग्यमहदादिसंघातरूपं[5] समुत्पन्नमिति ।

इतश्चात्मास्ति-- **त्रिगुणादिविपर्ययात्** । यदुक्तं पूर्वस्यामार्यायां 'त्रिगुणमविवेकि विषय' इत्यादि, तस्माद् विपर्ययात् । येनोक्तं 'तद्विपरीतस्तथा च[6] पुमान्' ।

**अधिष्ठानात्** । यथेह लंघनप्लवनधावनसमर्थैरश्वैर्युक्तो रथः सारथिनाधिष्ठितः प्रवर्तते तथा आत्माधिष्ठानाच्छरीरमिति । तथा चोक्तं षष्ठितन्त्रे— 'पुरुषाधिष्ठितं प्रधानं प्रवर्तते' ।

---

१. 'संहतपरार्थत्वात्' इति वि०- पुस्तकधृतः पाठो भ्रान्त इति स्पष्टमेव ।

२. मा०, वि०- कैवल्यार्थप्रवृत्तेश्च । भाष्योद्धृतटिप्पण्यां तु कैवल्यार्थमिति पाठः ।

३. वि०- व्यक्ताव्यक्तविज्ञानात् ।

४. वि०- °वट° ।

५. वि०- भोग्यशरीरं भोग्यं महदादिसंघातरूपं ।

६. 'च' इति वि०- पुस्तके नास्ति ।



अतोऽस्त्यात्मा—**भोक्तृत्वात्**[1] । यथा मधुराम्ललवणकटुतिक्तकषायषड्रसोपबृंहितस्य संयुक्तस्यान्नस्य[2] साध्यते, एवं महदादिलिङ्गस्य भोक्तृत्वाऽभावादस्ति स आत्मा यस्येदं भोग्यं शरीरमिति ।

इतश्च—**कैवल्यार्थं प्रवृत्तेश्च** । केवलस्य भावः कैवल्यम् । तन्निमित्तं या च प्रवृत्तिस्तस्याः स्वकैवल्यार्थं प्रवृत्तेः सकाशादनुमीयते, अस्त्यात्मेति । यतः सर्वो विद्वानविद्वांश्च संसारक्षयमिच्छति । एवमेभिर्हेतुभिरस्त्यात्मा शरीराद्व्यतिरिक्तः ॥ १७ ॥

---

अथ स किमेकः सर्वशरीरेऽधिष्ठाता मणिरसनात्मकसूत्रवत्, आहोस्वित् बहव आत्मानः प्रतिशरीरमधिष्ठातार इत्यत्रोच्यते—

**जननमरणकरणानां[3] प्रतिनियमादयुगपत्प्रवृत्तेश्च ।**
**पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव ॥ १८ ॥**

**१८ अन्वयः ।**—जन्ममरणकरणानां प्रतिनियमात् अयुगपत्प्रवृत्तेश्च त्रैगुण्यविपर्ययाच्चैव पुरुषबहुत्वं सिद्धम् ।

जन्म च मरणं च करणानि च जन्ममरणकरणानि । तेषां **प्रतिनियमात्**, प्रत्येकनियमादित्यर्थः । यद्येक एवात्मा स्यात्तत एकस्य जन्मनि सर्व एव जायेरन् एकस्य मरणे सर्वेऽपि म्रियेरन्, एकस्य करणवैकल्ये बाधिर्यान्धत्वमूकत्वकुणित्वखंजत्वलक्षणे सर्वेऽपि बधिरान्धकुणिखंजाः स्युः । न चैवं भवति तस्माज्जन्ममरणकरणानां प्रतिनियमात् पुरुषबहुत्वं सिद्धम् ।

इतश्च-**अयुगपत्प्रवृत्तेश्च** । युगपदेककालम्, न युगपदयुगपत् प्रवर्तनम् । यस्माद्युगपद्धर्मादिषु प्रवृत्तिर्दृश्यते । एके धर्मे प्रवृत्ताः, अन्येऽधर्मे, वैराग्येऽन्ये, ज्ञानेऽन्ये प्रवृत्ताः, तस्मादयुगपत्प्रवृत्तेश्च बहव इति सिद्धम् ।

किं चान्यत्-**त्रैगुण्यविपर्ययाच्चैव** । त्रिगुणभावविपर्ययाच्च पुरुषबहुत्वं सिद्धम् । यथा सामान्ये जन्मनि एकः सात्त्विकः सुखी, अन्यो राजसो दुःखी, अन्यस्तामसो मोहवान् । एवं त्रैगुण्यविपर्ययाद्बहुत्वं सिद्धमिति ॥ १८ ॥

---

१. कारिकामूलपाठानुरोधात् 'भोक्तृभावात्' इति पठनीयम् ।

२. अत्र 'भोक्ता' इत्यपेक्षितम् ।

३. भाष्यानुरोधेन तु 'जन्ममरण' इत्यादि पठनीयम् ।

अकर्ता पुरुष इत्येतदुच्यते —

**तस्माच्च विपर्यासात् सिद्धं साक्षित्वमस्य पुरुषस्य ।**
**कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्तृभावश्च ॥ १९ ॥**

**१९ अन्वयः** ।—तस्माच्च विपर्यासात् अस्य पुरुषस्य साक्षित्वं सिद्धं ( **तथा** ) कैवल्यं माध्यस्थ्यं द्रष्टृत्वम् अकर्तृभावश्च ( सिद्धानि ) ।

**तस्माच्च विपर्यासात्** । तस्माच्च यथोक्तत्रैगुण्यविपर्यासात्, विपर्ययात् । निर्गुणः पुरुषो विवेकी भोक्तेत्यादिगुणानां पुरुषस्य यो विपर्यास उक्तः तस्मात्—

सत्त्वरजस्तमःसु कर्तृभूतेषु **साक्षित्वं सिद्धं पुरुषस्येति** । योऽयमधिकृतो बहुत्वं प्रति । गुणा एव कर्तारः प्रवर्त्तन्ते, साक्षी नापि प्रवर्तते नापि निवर्तत एव ।

किं चान्यत्, **कैवल्यम्** । केवलभावः कैवल्यमन्यत्वमित्यर्थः । त्रिगुणेभ्यः केवलः अन्यः[1] ।

**माध्यस्थ्यम्** मध्यस्थभावः । परिव्राजकवत् मध्यस्थः पुरुषः । यथा कश्चित् परिव्राजको ग्रामीणेषु कर्षणार्थेषु प्रवृत्तेषु केवलो मध्यस्थः, पुरुषोऽप्येषु गुणेषु वर्तमानेषु न प्रवर्तते ।

तस्मात्, **द्रष्टृत्वमकर्तृभावश्च** । यस्मान्मध्यस्थस्तस्मात् द्रष्टा तस्मादकर्ता पुरुषस्तेषां कर्मणामिति । सत्त्वरजस्तमांसि त्रयो गुणाः कर्मकर्तृभावेन प्रवर्तन्ते न पुरुषः, एवं पुरुषस्यास्तित्वं च सिद्धम् ॥ १९ ॥

---

यस्मादकर्ता[2] पुरुषस्तत्कथमध्यवसायं करोति धर्मं करिष्याम्यधर्मं न करिष्यामीति । अतः, कर्ता भवति— न च कर्ता पुरुषः—, एवमुभयथा[3] दोषः स्यादिति । अत उच्यते—

**तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम् ।**
**गुणकर्तृत्वे च[4] तथा कर्तेव भवत्युदासीनः ॥ २० ॥**

**२० अन्वयः** ।—तस्मात् तत् संयोगात् अचेतनं लिङ्गं चेतनावदिव ( भवति ) तथा उदासीनः गुणकर्तृत्वे च कर्तेव भवति ।

---

१. वि०-अन्यत् ।
२. वि०-यस्मात्कर्ता ।
३. वि०-°मुभयात्र ।
४. ज०-°कर्तृत्वेऽपि ।



इह पुरुषश्चेतनावान्[1] । तेन चेतनावभाससंयुक्तं[2] महदादि लिङ्गं **चेतनावदिव** भवति । यथा लोके घटः शीतसंयुक्तः शीतः, उष्णसंयुक्त उष्णः, एवं महदादि लिङ्गं तस्य **संयोगात्** पुरुषसंयोगाच्चेतनावदिव भवति । तस्माद्गुणा अध्यवसायं कुर्वन्ति न पुरुषः ।

यद्यपि लोके पुरुषः कर्ता गन्तेत्यादि प्रयुज्यते तथाऽप्यकर्ता पुरुषः । कथम्—**गुणकर्तृत्वे च तथा कर्तेव भवत्युदासीनः** । गुणानां कर्तृत्वे सति उदासीनोऽपि पुरुषः कर्तेव भवति, न कर्ता । अत्र दृष्टान्तो भवति—यथा अचौरश्चौरैः सह गृहीतश्चौर इत्यवगम्यते, एवं त्रयो गुणाः कर्तारस्तैः संयुक्तः पुरुषोऽकर्ताऽपि कर्ता भवति, कर्तृसंयोगात् । एवं व्यक्ताव्यक्तज्ञानां विभागो विख्यातः, यद्विभागान्मोक्षप्राप्तिरिति ॥ २० ॥

---

अथैतयोः प्रधानपुरुषयोः किंहेतुः संघातः—उच्यते—

**पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य ।**
**पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः ॥ २१ ॥**

**२१ अन्वयः** ।—पुरुषस्य दर्शनार्थं तथा प्रधानस्य कैवल्यार्थं पङ्ग्वन्धवत् उभयोरपि संयोगः, तत्कृतः सर्गः ।

**पुरुषस्य** प्रधानेन सह **संयोगो दर्शनार्थम्** । प्रकृतिं महदादिकार्यं भूतादिपर्यन्तं[3] पुरुषः पश्यति ।

एतदर्थं **प्रधानस्यापि** पुरुषेण संयोगः **कैवल्यार्थम्** ।

स च संयोगः **पङ्ग्वन्धवदुभयोरपि** द्रष्टव्यः । यथा—एकः पङ्गुरेकश्चान्धः, एतौ द्वावपि गच्छन्तौ, महता सामर्थ्येनाटव्यां सार्थस्य स्तेनकृतादुपप्लवात्, स्वबन्धुपरित्यक्तौ दैवादितश्चेतश्च चेरतुः[4] । स्वगत्या च तौ संयोगमुपयातौ । पुनस्तयोः स्ववचसोर्विश्वस्तत्वेन संयोगो गमनार्थं दर्शनार्थं च भवति । अन्धेन पङ्गुः स्वस्कन्धमारोपितः एवं शरीरारूढपङ्गुदर्शितेन मार्गेणान्धो याति, पङ्गुश्चान्धस्कन्धारूढः । एवं पुरुषे दर्शनशक्तिरस्ति पङ्गुवत्, न क्रिया ।

---

१. वि०- °श्चेतनाकृत् ।
२. वि०- °भासं युक्तं ।
३. वि०- महदादिकार्यभूतपर्यन्तं ।
४ वि०- दैवादितश्चेरुश्च ।

प्रधाने क्रियाशक्तिरस्त्यन्धवत्, न दर्शनशक्तिः। यथा वा अनयोः पङ्ग्वन्धयोः कृतार्थयोर्विभागो भविष्यतीप्सितस्थानप्राप्तयोः, एवं प्रधानमपि पुरुषस्य मोक्षं कृत्वा निवर्तते, पुरुषोऽपि प्रधानं दृष्ट्वा कैवल्यं गच्छति। तयोः कृतार्थयोर्विभागो भविष्यति।

किं चान्यत्, **तत्कृतः सर्गः**। तेन संयोगेन कृतस्तत्कृतः सर्गः, सृष्टिः। यथा स्त्रीपुरुषसंयोगात् सुतोत्पत्तिस्तथा प्रधानपुरुषसंयोगात् सर्गस्योत्पत्तिः॥२१॥

---

इदानीं सर्वविभागदर्शनार्थमाह—

**प्रकृतेर्महान्, ततोऽहङ्कारः, तस्माद्गणश्च षोडशकः।**
**तस्मादपि षोडशकात् पञ्चभ्यः पञ्च भूतानि॥ २२॥**

**२२ अन्वयः**।–प्रकृतेः महान् ततः अहङ्कारः तस्माच्च षोडशकः गणः तस्मात् षोडशकादपि पञ्चभ्यः पञ्च भूतानि ( जायन्ते )।

प्रकृतिः, प्रधानं, ब्रह्म, अव्यक्तं, बहुधात्मकं[१] मायेति पर्यायाः। अलिङ्गस्य[२] **प्रकृतेः** सकाशान्महानुत्पद्यते। महान्, बुद्धिः, आसुरी, मतिः, ख्यातिः, ज्ञानं, इति[३] प्रज्ञापर्यायैरुत्पद्यते।

तस्माच्च महतोऽ**हङ्कार** उत्पद्यते। अहङ्कारः, भूतादिः, वैकृतः, तैजसः, अभिमान इति पर्यायाः।

**तस्माद्गणश्च षोडशकः**। तस्मादहङ्कारात् षोडशकः षोडशस्वरूपो गण उत्पद्यते। स यथा–पञ्चतन्मात्राणि। शब्दतन्मात्रं, स्पर्शतन्मात्रं, रूपतन्मात्रं, रसतन्मात्रं, गन्धतन्मात्रमिति। तत एकादशेन्द्रियाणि। श्रोत्रं, त्वक्, चक्षुषी, जिह्वा, घ्राणमिति पञ्च बुद्धीन्द्रियाणि। वाक्पाणिपादपायूपस्थाः[४] पञ्च कर्मेन्द्रियाणि। उभयात्मकमेकादशं मनः। एष षोडशको गणोऽहङ्कारादुत्पद्यते।

---

१. वि०–, ब०–; बहुधानकं। बहुधात्मकमिति पाठो माठरवृत्तिसम्मतः।
२. वि०–' अलिङ्गस्याः '। मूलपाठस्तु ब०–पुस्तके दृश्यते ' अलिङ्गायाः ' इति पठनीयम् ?
३. ब ' इति ' शब्दो वि०–पुस्तके नास्ति, ब०–पुस्तक उपलभ्यते।
४. ब०– °पस्थानि।



किं च, **पञ्चभ्यः पञ्च भूतानि**। **तस्मात् षोडशकात्** गणात् पञ्चभ्यस्तन्मात्रेभ्यः सकाशात् पञ्च वै महाभूतान्युत्पद्यन्ते। यदुक्तं—शब्दतन्मात्रादाकाशम्, स्पर्शतन्मात्राद्वायुः, रूपतन्मात्रात्तेजः, रसतन्मात्रादापः, गन्धतन्मात्रात् पृथिवी। एवं पञ्चभ्यः परमाणुभ्यः पञ्च महाभूतान्युत्पद्यन्ते॥ २२॥

---

यदुक्तं–व्यक्ताव्यक्तज्ञविज्ञानान्मोक्ष इति, तत्र महदादिभूतान्तं त्रयोविंशतिभेदं[१] व्याख्यातम्। अव्यक्तमपि ' भेदानां परिमाणात् ' इत्यादिना व्याख्यातम्। पुरुषोऽपि ' संघातपरार्थत्वात् ' इत्यादिभिर्हेतुभिर्व्याख्यातः। एवमेतानि पञ्चविंशतितत्त्वानि। यस्तैस्त्रैलोक्यं[२] व्याप्तं जानाति[३]। तस्य भावोऽस्तित्वं, तत्त्वम्। यथोक्तम्—

पञ्चविंशतितत्त्वज्ञो यत्र कुत्राश्रमे रतः।
जटी मुण्डी शिखी वापि मुच्यते नात्र संशयः॥

तानि यथा–प्रकृतिः, पुरुषः, बुद्धिः, अहङ्कारः, पञ्च तन्मात्राणि, एकादशेन्द्रियाणि, पञ्च महाभूतानि। इत्येतानि पञ्चविंशतितत्त्वानि। तत्रोक्तं, प्रकृतेर्महानुत्पद्यते। तस्य किं लक्षणमेतदाह—

**अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यम्।**
**सात्त्विकमेतद्रूपं तामसमस्माद्विपर्यस्तम्॥ २३॥**

**२३ अन्वयः**।—अध्यवसायः बुद्धिः धर्मः ज्ञानं विराग ऐश्वर्यम् एतत् सात्त्विकं रूपम्। अस्मात् विपर्यस्तं तामसं ( रूपम् )।

**अध्यवसायो** बुद्धिलक्षणम्। अध्यवसानमध्यवसायः। यथा बीजे भविष्यद्वृत्तिकोऽङ्कुरस्तद्वदध्यवसायः। अयं घटः, अयं पटः, इत्येवं सति[४] या सा बुद्धिरिति लक्ष्यते।

---

१.–अत्र ' व्यक्तं ' इत्यपेक्षितम्।
२. ब०–पुस्तके पाठः। वि०–यस्त्रैलोक्यं।
३. ' स मुच्यते ' इत्यधिकमत्रापेक्षितम्, इति माठरवृत्तिटिप्पण्याम्, पृ. ३५।
४. वि०–सति।

सा च बुद्धिरष्टाङ्गिका, सात्त्विकतामसरूपभेदात् । तत्र बुद्धेः[1] **सात्त्विकं रूपं** चतुर्विधं भवति—**धर्मः, ज्ञानं, वैराग्यं, ऐश्वर्यं** चेति । तत्र धर्मो नाम दयादानयमनियमलक्षणः । तत्र यमा नियमाश्च पातञ्जलेऽभिहिताः । 'अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः ' ( यो. सू २, ३० ) । 'शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः ' ( यो. सू. २, ३२ ) । ज्ञानं, प्रकाशः, अवगमः, भानमिति पर्यायाः । तच्च द्विविधम् । बाह्यमाभ्यन्तरं चेति । तत्र बाह्यं नाम वेदाः शिक्षाकल्पव्याकरणनिरुक्तच्छन्दोज्योतिषाख्यषडङ्गसहिताः[2] । पुराणानि, न्यायमीमांसाधर्मशास्त्राणि चेति । आभ्यन्तरं प्रकृतिपुरुषज्ञानम् । इयं प्रकृतिः सत्त्वरजस्तमसां साम्यावस्था, अयं पुरुषः सिद्धो निर्गुणो व्यापी चेतन इति । तत्र बाह्यज्ञानेन लोकपङ्क्तिर्लोकानुराग इत्यर्थः, आभ्यन्तरेण ज्ञानेन मोक्ष इत्यर्थः । वैराग्यमपि द्विविधं, बाह्यमाभ्यन्तरं च । बाह्यं दृष्टविषयवैतृष्ण्यं, अर्जनरक्षणक्षयसंगहिंसादोषदर्शनात् विरक्तस्य । आभ्यन्तरं—प्रधानमप्यत्र स्वप्नेन्द्रजालसदृशमिति विरक्तस्य मोक्षेप्सोर्यदुत्पद्यते तदाभ्यन्तरं वैराग्यम् । ऐश्वर्यमीश्वरभावः । तच्चाष्टगुणम्—अणिमा, महिमा, गरिमा, लघिमा, प्राप्तिः, प्राकाम्यं, ईशित्वं, वशित्वं, यत्रकामावसायित्वं चेति । अणोर्भावोऽणिमा, सूक्ष्मो भूत्वा जगति विचरतीति । महिमा, महान् भूत्वा विचरतीति, लघिमा, मृणालीतूलावयवादपि लघुतया पुष्पकेसराग्रेष्वपि तिष्ठति । प्राप्तिः, अभिमतं वस्तु यत्रतत्रावस्थितं प्राप्नोति । प्राकाम्यं, प्रकामतो यदेवेच्छति तदेव विदधाति । ईशित्वं, प्रभुतया त्रैलोक्यमपि ईष्टे । वशित्वं, सर्वं वशीभवति । यत्रकामावसायित्वं, ब्रह्मादिस्तम्बपर्यन्तं यत्र कामस्तत्रैवास्य स्वेच्छया स्थानासनविहारानाचरतीति । चत्वारि एतानि बुद्धेः सात्त्विकानि रूपाणि । यदा सत्त्वेन रजस्तमसी अभिभूते तदा पुमान् बुद्धिगुणान् धर्मादीनाप्नोति ।

किं चान्यत् **तामसमस्माद्विपर्यस्तम** । अस्मात् धर्मादेर्विपरीतं तामसं बुद्धिरूपम् । तत्र धर्माद्विपरीतोऽधर्मः । एवमज्ञानं, अवैराग्यं, अनैश्वर्यमिति । एवं सात्त्विकैस्तामसैः स्वरूपैरष्टाङ्गा बुद्धिस्त्रिगुणादव्यक्तादुत्पद्यते ॥ २३ ॥

---

१. 'तत्र बुद्धेः ' इति ब०—पुस्तके नास्ति ।
२. ब०—पुस्तकपाठः । वि०—पुस्तके तु 'शिक्षा कल्पो व्याकरणं निरुक्तं छंदोज्योतिषाख्यषडङ्गसहिताः' ।



एवं बुद्धिलक्षणमुक्तं, अहङ्कारलक्षणमुच्यते—

**अभिमानोऽहङ्कारस्तस्माद्द्विविधः प्रवर्तते सर्गः ।**
**एकादशकश्च गणस्तन्मात्रः पञ्चकश्चैव[1] ॥ २४ ॥**

**२४ अन्वयः** ।—अभिमानः अहङ्कारः । तस्मात् एकादशकः गणश्च पञ्चकः तन्मात्रश्च ( इति ) द्विविधः सर्गः प्रवर्तते ।

**एकादशकश्च गणः** । एकादशेन्द्रियाणि । तथा **तन्मात्रो गणः पञ्चकः**, पञ्चलक्षणोपेतः । शब्दतन्मात्रस्पर्शतन्मात्ररूपतन्मात्ररसतन्मात्रगन्धतन्मात्रलक्षणोपेतः ॥ २४ ॥

---

किंलक्षणात् सर्ग इत्येतदाह—

**सात्त्विक एकादशकः प्रवर्तते वैकृतादहङ्कारात् ।**
**भूतादेस्तन्मात्रः स तामसः, तैजसादुभयम ॥ २५ ॥**

**२५ अन्वयः** ।— वैकृतात् अहङ्कारात् सात्त्विक एकादशकः प्रवर्तते । भूतादेः तन्मात्रः ( प्रवर्तते ) स तामसः । तैजसात् ( अहङ्कारात् ) उभयं ( प्रवर्तते ) ।

सत्त्वेनाभिभूते यदा रजस्तमसी अहङ्कारे भवतस्तदा सोऽहङ्कारः **सात्त्विकः** । तस्य च पूर्वाचार्यैः संज्ञा कृता वैकृत इति । तस्मात् **वैकृतात्[2] अहङ्कारादेकादशक** इन्द्रियगण उत्पद्यते । तस्मात् सात्त्विकानि विशुद्धानीन्द्रियाणि स्वविषयसमर्थानि । तस्मादुच्यते—'**सात्त्विक एकादशकः**' इति ।

किं चान्यत, **भूतादेस्तन्मात्रः स तामसः** । तमसाऽभिभूते सत्त्वरजसी अहङ्कारे यदा भवतः सोऽहङ्कारस्तामस उच्यते ; तस्य पूर्वाचार्यकृता संज्ञा भूतादिः । तस्माद्भूतादेः अहङ्कारात् तन्मात्रः पञ्चको गण उत्पद्यते । भूतानामादिभूतस्तमोबहुलस्तेनोक्तः स तामस इति । तस्माद्भूतादेः पञ्चतन्मात्रको गणः ।

किं च, **तैजसादुभयम्** । यदा रजसाभिभूते सत्त्वतमसी भवतस्तदा तस्मात् सोऽहङ्कारस्तैजस इति संज्ञां लभते । तस्मात्तैजसादुभयमुत्पद्यते ।

---

१. वा०- तन्मात्रपञ्चकश्चैव ।
२. वि०-विकृतात् ।

उभयमिति एकादशो गणः, तन्मात्रः पञ्चकः । योऽयं सात्त्विकोऽहङ्कारो वैकृतिको वैकृतो भूत्वा एकादशेन्द्रियाण्युत्पादयति स तैजसमहङ्कारं सहायं गृह्णाति । सात्त्विको निष्क्रियः, स तैजसयुक्त इन्द्रियोत्पत्तौ समर्थः । तथा तामसोऽहङ्कारो भूतादिसंज्ञितो निष्क्रियत्वात् तैजसेनाहङ्कारेण क्रियावता युक्तस्तन्मात्राण्युत्पादयति । तेनोक्तं––तैजसादुभयमिति । एवं तैजसेनाहङ्कारेणेन्द्रियाण्येकादश पञ्चतन्मात्राणि कृतानि भवन्ति ॥ २५ ॥

---

सात्त्विक एकादशक इत्युक्तः, यो वैकृतात्[1] सात्त्विकादहङ्कारादुत्पद्यते तस्य का संज्ञेत्याह––

**बुद्धीन्द्रियाणि चक्षुःश्रोत्रघ्राणरसनस्पर्शनकानि[2] ।**
**वाक्पाणिपादपायूपस्थान्[3] कर्मेन्द्रियाण्याहुः ॥ २६ ॥**

**२६ अन्वयः** ।––चक्षुःश्रोत्रघ्राणरसनस्पर्शनकानि बुद्धीन्द्रियाणि, वाक्पाणिपादपायूपस्थान् ( च ) कर्मेन्द्रियाणि आहुः ।

चक्षुरादीनि स्पर्शनपर्यन्तानि **बुद्धीन्द्रियाण्युच्यन्ते** । स्पृश्यतेऽनेन इति स्पर्शनं, त्वगिन्द्रियम् । तद्वाची सिद्धः स्पर्शनशब्दोऽस्ति, तेनेदं पठ्यते **स्पर्शनकानीति** । शब्दस्पर्शरूपरसगन्धान् पञ्च विषयान् बुध्यन्ते अवगच्छन्तीति पञ्चबुद्धीन्द्रियाणि ।

**वाक्पाणिपादपायूपस्थान् कर्मेन्द्रियाण्याहुः** । कर्म कुर्वन्तीति **कर्मेन्द्रियाणि** । तत्र वाक् वदति, हस्तौ नानाव्यापारं कुरुतः, पादौ **गमनागमनम्**, पायुरुत्सर्गं करोति, उपस्थ आनन्दं प्रजोत्पत्त्या ॥ २६ ॥

---

एवं बुद्धीन्द्रियकर्मेन्द्रियभेदेन दश इन्द्रियाणि व्याख्यातानि । मन एकादशं किमात्मकं किंस्वरूपं चेति तदुच्यते ––

**उभयात्मकमत्र मनः संकल्पकमिन्द्रियं च साधर्म्यात् ।**
**गुणपरिणामविशेषान्नानात्वं बाह्यभेदाश्च[4] ॥ २७ ॥**

1.–यत्तु एतदनन्तरं ब०– पुस्तके 'सात्त्विक एकादशकः' इत्यधिकमुपलभ्यते तद्भ्रममूलकमेवेति भाति ।
2. वा०– ° रसनत्वगाख्यानि ।
3. वा– ° पस्थानि ।
4. मा०– ग्राह्यभेदाच्च ।



**२७ अन्वयः** ।––अत्र मनः उभयात्मकम् । संकल्पकं साधर्म्यात् इन्द्रियं च । गुणपरिणामविशेषात् नानात्वं बाह्यभेदाश्च ।

अत्रेन्द्रियवर्गे **मन उभयात्मकं** । बुद्धीन्द्रियेषु बुद्धीन्द्रियवत्, कर्मेन्द्रियेषु कर्मेन्द्रियवत् । कस्मात्, बुद्धीन्द्रियाणां प्रवृत्तिं कल्पयति कर्मेन्द्रियाणां च । तस्मादुभयात्मकं मनः । संकल्पयतीति **संकल्पकम्** ।

किं चान्यत्, **इन्द्रियं च साधर्म्यात्** । समानधर्मभावात् । सात्त्विकाहङ्कारात् बुद्धीन्द्रियाणि कर्मेन्द्रियाणि मनसा सहोत्पद्यमानानि मनसः साधर्म्यं प्रति ( पादयन्ति )[1] । तस्मात् साधर्म्यान्मनोऽपीन्द्रियम् । एवमेतान्येकादशेन्द्रियाणि सात्त्विकाद्वैकृतादहङ्कारादुत्पन्नानि । तत्र मनसः का वृत्तिरिति–संकल्पो वृत्तिः । बुद्धीन्द्रियाणां शब्दादयो वृत्तयः, कर्मेन्द्रियाणां वचनादयः ।

अथैतानीन्द्रियाणि भिन्नानि भिन्नार्थग्राहकाणि किमीश्वरेण उत स्वभावेन कृतानि, यतः प्रधानबुद्ध्यहङ्कारा अचेतनाः, पुरुषोऽप्यकर्ता, इत्यत्राह–इह सांख्यानां स्वभावो नाम कश्चित्कारणमस्ति । अत्रोच्यते–गुणपरिणामविशेषान्नानात्वं बाह्यभेदाश्च । इमान्येकादशेन्द्रियाणि[2] शब्दस्पर्शरूपरसगन्धाः पञ्चानाम्, वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानाम्, संकल्पश्च मनसः । एवमेते भिन्नानामेवेन्द्रियाणां अर्थाः, **गुणपरिणामविशेषात्**—गुणानां परिणामो गुणपरिणामः । तस्य विशेषात् इन्द्रियाणां **नानात्वं बाह्यभेदाश्च** । अथैतन्नानात्वं नेश्वरेण, नाहङ्कारेण, न बुद्ध्या, न प्रधानेन, न पुरुषेण, स्वभावात् कृतगुणपरिणामेनेति । गुणानामचेतनत्वान्न प्रवर्तते; प्रवर्तत एव । कथं–वक्ष्यतीहैव–

वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य ।
पुरुषस्य विमोक्षार्थं तथा प्रवृत्तिः प्रधानस्य ॥

एवमचेतना गुणाः एकादशेन्द्रियभावेन प्रवर्तन्ते । विशेषा अपि तत्कृता एव[3] । येनोच्चैः प्रदेशे चक्षुरवलोकनाय[4] स्थितं, तथा घ्राणं,

1. धनुश्चिह्नाङ्कितः पाठो मदीयः, मूलस्थितस्य 'प्रति' इति शब्दस्य अत्रार्थप्रतिपादकत्वाभावात् ।
2. 'भिन्नार्थानि' इत्यधिकमत्रापेक्षितमिव भाति, माठरवृत्तिरत्र द्रष्टव्या ।
3. ब.०–विशेषोऽपि तत्कृत एव ।
4. ब.०–पुस्तकपाठः । वि०–चक्षुः०–खलोकनाय ।

तथा श्रोत्रं, तथा जिह्वा, स्वदेशे स्वार्थग्रहणाय । एवं कर्मेन्द्रियाण्यपि यथा-यथं स्वार्थसमर्थानि स्वदेशावस्थितानि स्वभावतो गुणपरिणामविशेषादेव, न तदर्था अपि । यत उक्तं शास्त्रान्तरे, "गुणा गुणेषु वर्तन्ते" । गुणानां या वृत्तिः सा गुणविषया एवेति बाह्यार्था विज्ञेया गुणकृता एवेत्यर्थः प्रधानं यस्य कारणमिति ॥ २७ ॥

---

अथेन्द्रियस्य कस्य का वृत्तिरित्युच्यते—

**शब्दादिषु पञ्चानामालोचनमात्रमिष्यते वृत्तिः ।**
**वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानाम् ॥ २८ ॥**

**२८ अन्वयः** ।—पञ्चानां रूपादिषु आलोचनमात्रं वृत्तिः इष्यते । पञ्चानाञ्च वचनादानविहरणोत्सर्गानन्दाः ( वृत्तयः इष्यन्ते ) ।

**मात्र**शब्दो विशेषार्थः, अविशेषव्यावृत्त्यर्थः । यथा भिक्षामात्रं लभ्यते नान्यो विशेष इति, तथा चक्षू रूपमात्रे न रसादिषु । एवं शेषाण्यपि । तद्यथा चक्षुषो रूपं, जिह्वाया रसः, घ्राणस्य गन्धः, श्रोत्रस्य शब्दः, त्वचः स्पर्शः । एवमेषां बुद्धीन्द्रियाणां वृत्तिः कथिता ।

कर्मेन्द्रियाणां वृत्तिः कथ्यते—**वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानाम्** । कर्मेन्द्रियाणामित्यर्थः । वाचो वचनं, हस्तयोरादानं, पादयोर्विहरणं, पायोर्भुक्तस्याहारस्य परिणतमलोत्सर्गः, उपस्थस्यानन्दः सुतोत्पत्तिः, विषयो[1]: वृत्तिरिति सम्बन्धः ॥ २८ ॥

---

अधुना बुद्ध्यहङ्कारमनसामुच्यते—

**स्वालक्षण्यं वृत्तिस्त्रयस्य सैषा भवत्यसामान्या ।**
**सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च ॥ २९ ॥**

**२९ अन्वयः** ।—त्रयस्य स्वालक्षण्यं वृत्तिः, सा एषा (वृत्तिः) असामान्या भवति । प्राणाद्याः पञ्च वायवः सामान्यकरणवृत्तिः ।

१. ब०–विषयः ।



स्वलक्षणस्वभावा **स्वालक्षण्या** । अध्यवसायो[1] बुद्धिरिति लक्षणमुक्तं, सैव बुद्धिवृत्तिः । तथा अभिमानोऽहङ्कार इत्यभिमानलक्षणो[2]ऽभिमानवृत्तिश्च । संकल्पकं मन इति लक्षणमुक्तं, तेन संकल्प एव मनसो वृत्तिः । त्रयस्य बुद्ध्यहङ्कारमनसां स्वालक्षण्या वृत्तिः ।

**असामान्या** । या प्रागभिहिता बुद्धीन्द्रियाणां च वृत्तिः साऽप्यसामान्यैवेति ।

इदानीं सामान्या वृत्तिराख्यायते । **सामान्यकरणवृत्तिः**, सामान्येन करणानां वृत्तिः । **प्राणाद्या वायवः पञ्च** । प्राणापानसमानोदानव्याना इति पञ्च वायवः सर्वेन्द्रियाणां सामान्या वृत्तिः । यतः प्राणो नाम वायुः मुखनासिकान्तर्गोचरः, तस्य यत् स्पन्दनं कर्म तत् त्रयोदशविधस्यापि सामान्या वृत्तिः । सति प्राणे यस्मात् करणानामात्मलाभ इति । प्राणोऽपि पञ्जरशकुनिवत् सर्वस्य चलनं करोतीति । प्राणनात् प्राण इत्युच्यते । तथा अपनयनादपानः, तत्र यत्स्पन्दनं तदपि सामान्यवृत्तिरिन्द्रियस्य । तथा समानो मध्यदेशवर्ती य आहारादीनां[3] समं नयनात् समानो वायुः, तत्र यत्स्पन्दनं तत् सामान्यकरणवृत्तिः । तथा ऊर्ध्वारोहणादुत्कर्षात् उन्नयनाद्वा उदानो नाभिदेशमस्तकान्तर्गोचरः, तत्रोदाने यत्स्पन्दनं तत् सर्वेन्द्रियाणां सामान्या वृत्तिः । किं च, शरीरव्याप्तिरभ्यन्तरविभागश्च येन क्रियतेऽसौ शरीरव्याप्त्या आकाशवद्व्यानः, तत्र यत् स्पन्दनं तत् करणजालस्य सामान्या वृत्तिरिति । एवमेते पञ्च वायवः सामान्यकरणवृत्तिरिति व्याख्याताः, त्रयोदशविधस्यापि करणसामान्या[4] वृत्तिरित्यर्थः ॥ २९ ॥

---

**युगपच्चतुष्टयस्य तु वृत्तिः क्रमशश्च तस्य निर्दिष्टा ।**
**दृष्टे तथाऽप्यदृष्टे त्रयस्य तत्पूर्विका वृत्तिः ॥ ३० ॥**

**३० अन्वयः** ।— दृष्टे चतुष्टयस्य तु तस्य युगपत् क्रमशश्च वृत्तिः निर्दिष्टा । तथाप्यदृष्टे त्रयस्य तत्पूर्विका ( युगपत् क्रमशश्च ) वृत्तिः ।

१. 'यो' इत्यधिकं वि०- पुस्तके ।
२. °लक्षणं- इति पठनीयम् ।
३. वि०- आहारादिनयनात् ।
४. 'करणस्य सामान्या' इति पठनीयम् ।

युगपच्चतुष्टयस्य । बुद्ध्यहङ्कारमनसामेकैकेन्द्रियसम्बन्धे सति चतुष्टयं भवति । चतुष्टयस्य दृष्टे प्रतिविषयाध्यवसाये युगपद्वृत्तिः । बुद्ध्यहङ्कारमनश्चक्षूंषि युगपदेककालं रूपं पश्यन्ति, स्थाणुरयमिति । बुद्ध्यहङ्कारमनोजिह्वा युगपद्रसं गृह्णन्ति बुद्ध्यहङ्कारमनोघ्राणानि युगपद्गन्धं गृह्णन्ति । तथा त्वक्श्रोत्रे अपि ।

किं च क्रमशश्च तस्य निर्दिष्टा । तस्येति चतुष्टयस्य क्रमशश्च वृत्तिर्भवति । यथा कश्चित् पथि गच्छन् दूरादेव दृष्ट्वा स्थाणुरयं पुरुषो वेति संशये सति तत्रोपरूढं[1] तल्लिङ्गं पश्यति शकुनिं वा, ततस्तस्य मनसा संकल्पिते संशये व्यवच्छेदभूता बुद्धिर्भवति स्थाणुरयमिति । अतः अहङ्कारश्च निश्चयार्थः स्थाणुरेवेति । एवं बुद्ध्यहङ्कारमनश्चक्षुषां क्रमशो वृत्तिर्दृष्टा । यथा रूपे तथा शब्दादिष्वपि बोद्धव्या । दृष्टे, दृष्टविषये ।

किं चान्यत्, तथाऽप्यदृष्टे त्रयस्य तत्पूर्विका वृत्तिः । अदृष्टेऽनागतेऽतीते च काले बुद्ध्यहङ्कारमनसां रूपे चक्षुःपूर्विका त्रयस्य वृत्तिः, स्पर्शे त्वक्पूर्विका, गन्धे घ्राणपूर्विका, रसे रसनपूर्विका, शब्दे श्रवणपूर्विका बुद्ध्यहङ्कारमनसामनागते भविष्यति काले अतीते च तत्पूर्विका क्रमशो वृत्तिः, वर्तमाने युगपत् क्रमशश्चेति ॥ ३० ॥

---

किं च —

**स्वां स्वां प्रतिपद्यन्ते परस्पराकूतहेतुकां[2] वृत्तिम् ।**
**पुरुषार्थ एव हेतुर्न केनचित्कार्यते करणम् ॥ ३१ ॥**

**३१ अन्वयः** ।—(करणानि) परस्पराकूतहेतुकां स्वां स्वां वृत्तिं प्रतिपद्यन्ते । पुरुषार्थ एव हेतुः, केनचित् करणं न कार्यते ।

**स्वां स्वा**मिति वीप्सा । बुद्ध्यहङ्कारमनांसि **स्वां स्वां वृत्तिं परस्पराकूतहेतुकां**, 'आकूतादरसम्भ्रम' इति । **प्रतिपद्यन्ते** पुरुषार्थकरणाय बुद्धेरहङ्कारादयः[3] । बुद्धिरहङ्काराकूतं ज्ञात्वा स्वस्वविषयं[4] प्रतिपद्यते ।

१. वि०- तत्रोपरूढां वर्हिं ।
२. ज०- °हेतुकीं ।
३. ब०- बुद्ध्यहङ्कारादयः ।
४. ब०- स्वविषयं ।



किमर्थमिति चेत्—**पुरुषार्थ एव हेतुः** । पुरुषार्थः कर्तव्य इत्येवमर्थं गुणानां प्रवृत्तिः । तस्मादेतानि करणानि पुरुषार्थं प्रकाशयन्ति । (यद्यचेतनानीति)[1] कथं स्वयं प्रवर्तन्ते—**न केनचित् कार्यते करणम्** । पुरुषार्थ एवैकः कारयतीति वाक्यार्थः । न केनचित् ईश्वरेण पुरुषेण कार्यते प्रबोध्यते करणम् ॥ ३१ ॥

---

बुद्ध्यादि कतिविधं तदित्युच्यते—

**करणं त्रयोदशविधं तदाहरणधारणप्रकाशकरम् ।**
**कार्यं च तस्य दशधाऽऽहार्यं धार्यं प्रकाश्यं च ॥ ३२ ॥**

**३२ अन्वयः** ।—करणं त्रयोदशविधं, तत् आहरणधारणप्रकाशकरम् । तस्य कार्यं दशधा आहार्यं धार्यं प्रकाश्यं च ।

**करणं** महदादि **त्रयोदशविधं** बोद्धव्यम् । पञ्च बुद्धीन्द्रियाणि चक्षुरादीनि, पञ्च कर्मेन्द्रियाणि वागादीनि[2] इति त्रयोदशविधं करणम् ।

तत्किं करोतीत्येतदाह— **तदाहरणधारणप्रकाशकरम्** । तत्राहरणं धारणं च कर्मेन्द्रियाणि कुर्वन्ति, प्रकाशं बुद्धीन्द्रियाणि ।

कतिविधं कार्यं तस्येति तदुच्यते । **कार्यं च तस्य दशधा** । तस्य करणस्य कार्यं कर्तव्यं दशधा दशप्रकारम् । शब्दस्पर्शरूपरसगन्धाख्यं, वचनादानविहरणोत्सर्गानन्दाख्यमेतद्दशविधं कार्यं, बुद्धीन्द्रियैः प्रकाशितं कर्मेन्द्रियाण्याहरन्ति धारयन्ति चेति ॥ ३२ ॥

---

किं च[3] —

**अन्तःकरणं त्रिविधं दशधा बाह्यं त्रयस्य विषयाख्यम् ।**
**साम्प्रतकालं बाह्यं त्रिकालमाभ्यन्तरं करणम् ॥ ३३ ॥**

**३३ अन्वयः** ।— अन्तःकरणं त्रिविधं, बाह्यं दशधा । (तत्) विषयाख्यम् । बाह्यं साम्प्रतकालम् आभ्यन्तरं करणं त्रिकालम् ।

१. धनुश्चिह्नांकितं केवलं ब०— पुस्तके लभ्यते ।
२. अत्र— 'बुद्ध्यहङ्कारौ मनः' इत्यधिकमपेक्षितम् । एतच्च माठरवृत्तावुपलभ्यते ।
३. केवलं ब०— पुस्तके लभ्यते ।

**अन्तःकरणमिति** बुद्ध्यहङ्कारमनांसि **त्रिविधं,** महदादिभेदात् ।

**दशधा बाह्यं च** । बुद्धीन्द्रियाणि पञ्च, कर्मेन्द्रियाणि पञ्च, दशविधमेतत्करणं बाह्यम् ।

**तत् त्रयस्य विषयाख्यम्** । बुद्ध्यहङ्कारमनसां भोग्यम् ।

**साम्प्रतकालम्** । श्रोत्रं वर्तमानमेव शब्दं शृणोति नातीतं न च भविष्यन्तम्, चक्षुरपि वर्तमानं रूपं पश्यति नातीतं नाऽनागतम्, त्वग् वर्तमानं स्पर्शम्, जिह्वा वर्तमानं रसम्, नासिका वर्तमानं गन्धं नातीतानागतं चेति एवं कर्मेन्द्रियाणि–वाग् वर्तमानं शब्दमुच्चारयति नातीतं नाऽनागतं च, पाणी वर्तमानं घटमाददाते नातीतमनागतं च, पादौ वर्तमानं पन्थानं विहरतो नातीतं नाप्यनागतम्, पायूपस्थौ च वर्तमानावुत्सर्गानन्दौ कुरुतो नातीतौ नाऽनागतौ । एवं बाह्यं करणं साम्प्रतकालमुक्तम् ।

**त्रिकालमाभ्यन्तरं करणम्** । बुद्ध्यहङ्कारमनांसि त्रिकालविषयाणि बुद्धिर्वर्तमानं घटं बुध्यते अतीतमनागतं चेति । अहङ्कारो वर्तमानेऽभिमानं करोति अतीतेऽनागते च । तथा मनो वर्तमाने संकल्पं कुरुते अतीतेऽनागते च । एवं त्रिकालमाभ्यन्तरं करणमिति ॥ ३३ ॥

---

इदानीमिन्द्रियाणि कति सविशेषं विषयं गृह्णन्ति, कानि निर्विशेषमिति तदुच्यते––

**बुद्धीन्द्रियाणि तेषां पञ्च विशेषाविशेषविषयाणि**[1] ।
**वाग्भवति शब्दविषया शेषाणि तु पञ्चविषयाणि**[2] ॥ ३४ ॥

**३४ अन्वयः** ।–– तेषां बुद्धीन्द्रियाणि पञ्च विशेषाविशेषविषयाणि । वाक् शब्दविषया भवति । शेषाणि तु ( इन्द्रियाणि ) पञ्चविषयाणि ( भवन्ति ) ।

**बुद्धीन्द्रियाणि** । तानि सविशेषं विषयं गृह्णन्ति । सविशेषविषयं मानुषाणां शब्दस्पर्शरूपरसगन्धान् सुखदुःखमोहयुक्तान् बुद्धीन्द्रियाणि प्रकाशयन्ति । देवानां निर्विशेषान् विषयान् प्रकाशयन्ति ।

तथा कर्मेन्द्रियाणां मध्ये **वाग्भवति शब्दविषया** । देवानां मानुषाणां च वाग्वदति श्लोकादीनुच्चारयति । तस्माद् देवानां मानुषाणां च वागिन्द्रियं तुल्यम् ।

---

१. ज०–विषयीणि । २. ज०–विषयीणि ।



**शेषाण्यपि** वाग्व्यतिरिक्तानि पाणिपादपायूपस्थसंज्ञितानि **पञ्चविषयाणि** । पञ्च विषयाः शब्दादयो येषां तानि पञ्चविषयाणि । शब्दस्पर्शरूपरसगन्धाः पाणौ सन्ति । पञ्चशब्दादिलक्षणायां भुवि पादो विहरति । पाय्विन्द्रियं पञ्चक्लृप्तं[1] उत्सर्गं करोति । तथोपस्थेन्द्रियं पञ्चलक्षणं शुक्रमानन्दयति ॥ ३४ ॥

---

**सान्तःकरणा बुद्धिः सर्वं विषयमवगाहते यस्मात् ।**
**तस्मात् त्रिविधं करणं द्वारि द्वाराणि शेषाणि ॥ ३५ ॥**

**३५ अन्वयः** ।–यस्मात् सान्तःकरणा बुद्धिः सर्वं विषयम् अवगाहते तस्मात् त्रिविधं करणं द्वारि शेषाणि द्वाराणि ।

**सान्तःकरणा बुद्धिः** । अहङ्कारमनःसहितेत्यर्थः । **यस्मात् सर्वं विषयमवगाहते** गृह्णाति, त्रिष्वपि कालेषु शब्दादीन् गृह्णाति, **तस्मात् त्रिविधं करणं द्वारि** । **द्वाराणि शेषाणि** । करणानीति वाक्यशेषः ॥ ३५ ॥

---

किं चान्यत् ––

**एते प्रदीपकल्पाः परस्परविलक्षणा गुणविशेषाः ।**
**कृत्स्नं पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छन्ति ॥ ३६ ॥**

**३६ अन्वयः** ।– प्रदीपकल्पाः परस्परविलक्षणाः एते गुणविशेषाः पुरुषस्य कृत्स्नम् अर्थं प्रकाश्य बुद्धौ प्रयच्छन्ति ।

यानि करणान्युक्तानि । **एते गुणविशेषाः** किंविशिष्टाः **प्रदीपकल्पाः** प्रदीपवद्विषयप्रकाशकाः ।

**परस्परविलक्षणाः** । असदृशाः, भिन्नविषया इत्यर्थः । ( गुणविषया इत्यर्थः ) ।

**गुणविशेषाः** । गुणेभ्यो जाताः ।

---

१. ब०– 'पञ्चलक्षणं' इत्यपि पाठः । २. धनुश्चिन्हांकितः पाठो–ब०–पुस्तके नोपलभ्यते ।

**कृत्स्नं पुरुषस्यार्थम्** । बुद्धीन्द्रियाणि, कर्मेन्द्रियाणि, अहङ्कारः, मनश्चैतानि स्वं स्वमर्थं पुरुषस्य प्रकाश्य बुद्धौ प्रयच्छन्ति, बुद्धिस्थं कुर्वन्तीत्यर्थः । यतो बुद्धिस्थं सर्वं विषयसुखादिकं[1] पुरुष उपलभ्यते ॥ ३६ ॥

---

इदं चान्यत्—

**सर्वं प्रत्युपभोगं यस्मात् पुरुषस्य साधयति बुद्धिः ।**
**सैव च विशिनष्टि पुनः प्रधानपुरुषान्तरं सूक्ष्मम् ॥ ३७ ॥**

३७ **अन्वयः**। — यस्मात् बुद्धिः पुरुषस्य सर्वं प्रत्युपभोगं साधयति । सैव च पुनः सूक्ष्मं प्रधानपुरुषान्तरं विशिनष्टि ।

सर्वेन्द्रियगतं त्रिष्वपि कालेषु, **सर्वम्** । **प्रत्युपभोगं**, उपभोगं प्रति । देवमनुष्यतिर्यग्बुद्धीन्द्रियकर्मेन्द्रियद्वारेण सान्तःकरणा **बुद्धिः साधयति** सम्पादयति **यस्मात्**, तस्मात् **सैव च विशिनष्टि** प्रधानपुरुषयोर्विषयविभागं करोति । **प्रधानपुरुषान्तरं** नानात्वमित्यर्थः ।

**सूक्ष्म**मित्यनधिकृततपश्चरणैरप्राप्यम् । इयं प्रकृतिः सत्त्वरजस्तमसां साम्यावस्था, इयं बुद्धिः, अयमहङ्कारः, एतानि पञ्चतन्मात्राणि, एकादशेन्द्रियाणि, पञ्च महाभूतानि, अयमन्यः पुरुष एभ्यो व्यतिरिक्तः, इत्येवं[2] बोधयति बुद्धिर्यस्यावायात्[3] अपवर्गो भवति ॥ ३७ ॥

---

पूर्वमुक्तं विशेषाविशेषविषयाणि, तत् के विषयाः तान्[4] दर्शयति—

**तन्मात्राण्यविशेषाः तेभ्यो भूतानि पञ्च पञ्चभ्यः ।**
**एते स्मृता विशेषाः शान्ता घोराश्च मूढाश्च ॥ ३८ ॥**

३८ **अन्वयः** ।—तन्मात्राणि अविशेषाः । तेभ्यः पञ्चभ्यः पञ्च भूतानि ( जायन्ते ) । एते शान्ता घोराश्च मूढाश्च विशेषाः स्मृताः ।

---

१. वि०– विषयं सुखादिकं ।
२. वि०– इत्येव ।
३. ब०– °वापात् ।
४. वि०– तच्च ।



यानि पञ्च **तन्मात्राणि** अहङ्कारादुत्पद्यन्ते तानि[1]– शब्दतन्मात्रं, स्पर्शतन्मात्रं, रूपतन्मात्रं, रसतन्मात्रं, गन्धतन्मात्रं—एतानि **अविशेषा** उच्यन्ते । देवानामेते सुखलक्षणा विषया दुःखमोहरहिताः ।

**तेभ्यः पञ्चभ्यः** तन्मात्रेभ्यः **पञ्च महाभूतानि**, पृथिव्यप्तेजोवाय्वाकाशसंज्ञानि, यान्युत्पद्यन्ते, **एते स्मृता विशेषाः** । गन्धतन्मात्रात् पृथिवी, रसतन्मात्रादापः, स्पर्शतन्मात्राद्वायुः, शब्दतन्मात्रादाकाशम्, इत्येवमुत्पन्नानि एतानि महाभूतानि ।

एते विशेषा मानुषाणां विषयाः, **शान्ताः** सुखलक्षणाः, **घोरा** दुःखलक्षणाः, **मूढा** मोहजनकाः । यथाकाशं कस्यचिदनवकाशादन्तर्गृहादेर्निर्गतस्य सुखात्मकं शान्तं भवति, तदेव पन्थानं गच्छतो वनमार्गाद् भ्रष्टस्य दिङ्मोहान्मूढं भवति । एवं वायुर्घर्मार्त्तस्य शान्तो भवति, शीतार्त्तस्य घोरः, धूलीशर्कराविमिश्रोऽतिवान् मूढ इति । एवं तेजःप्रभृतिषु द्रष्टव्यम् ॥ ३८ ॥

---

अथाऽन्ये विशेषाः—

**सूक्ष्मा मातापितृजाः सह प्रभूतैस्त्रिधा विशेषाः स्युः ।**
**सूक्ष्मास्तेषां नियता मातापितृजा निवर्तन्ते ॥ ३९ ॥**

३९ **अन्वयः** । —सूक्ष्माः मातापितृजाः प्रभूतैः सह त्रिधा विशेषाः स्युः । तेषां सूक्ष्माः नियताः, मातापितृजाः निवर्तन्ते ।

**सूक्ष्माः** तन्मात्राणि । यत्संगृहीतं सूक्ष्मशरीरं महदादिलिङ्गं सदा तिष्ठति संसरति च ते सूक्ष्माः ।

तथा **मातापितृजाः** स्थूलशरीरोपचायका ऋतुकाले मातापितृसंयोगे शोणितशुक्रमिश्रीभावेन उदरान्तः सूक्ष्मशरीरस्योपचयं कुर्वन्ति[2] । तत् सूक्ष्मशरीरं पुनर्मातुरशितपीतनानाविधरसेन नाभीनिबन्धेनाप्यायते ।

तथा प्रारब्धं[3] शरीरं सूक्ष्मैर्मातापितृजैश्च सह महाभूतैः **त्रिधा विशेषैः** पृष्ठोदरजंघाकट्युरःशिरः प्रभृति षाट्कौशिकं पाञ्चभौतिकं[4], रुधिर-

---

१. मदीयः पाठः । वि०– पुस्तके 'ते' । ब०– पुस्तके किमपि नास्ति ।
२. वि०– कुर्वीत ।
३. ब०–तथाप्यारब्धं ।
४. वि०– पञ्चभौतिकं ।

मांसस्नायुशुक्रास्थिमज्जासंभृतं—आकाशोऽवकाशदानात्, वायुर्वर्धनात्, तेजः पाकात्, आपः संग्रहात्, पृथिवी धारणात्—समस्तावयवोपेतं मातुरुदराद्बहिर्भवति । एवमेते **त्रिविधा विशेषाः स्युः** ।

अत्राह—के नित्याः के वाऽनित्याः—**सूक्ष्मास्तेषां नियताः** । सूक्ष्मास्तन्मात्रसंज्ञकास्तेषां मध्ये नियता नित्याः । तैरारब्धं शरीरं, कर्मवशात् पशुमृगपक्षिसरीसृपस्थावरजातिषु संसरति, धर्मवशादिन्द्रादिलोकेषु । एवमेतत् नियतं सूक्ष्मशरीरं संसरति न[1] यावत् ज्ञानमुत्पद्यते । उत्पन्ने ज्ञाने विद्वान् शरीरं त्यक्त्वा मोक्षं गच्छति । तस्मादेते विशेषाः सूक्ष्मा नित्या इति ।

**मातापितृजा निवर्तन्ते** । तत् सूक्ष्मशरीरं परित्यज्य इहैव प्राणत्यागवेलायां मातापितृजा निवर्तन्ते । मरणकाले मातापितृजं शरीरमिहैव निवृत्त्य[2] भूम्यादिषु प्रलीयते यथातत्त्वम् ॥ ३९ ॥

---

सूक्ष्मं च कथं संसरति तदाह—

**पूर्वोत्पन्नमसक्तं नियतं महदादिसूक्ष्मपर्यन्तम् ।**
**संसरति निरुपभोगं भावैरधिवासितं लिङ्गम् ॥ ४० ॥**

**४० अन्वयः** ।— लिङ्गं पूर्वोत्पन्नं असक्तं नियतं महदादिसूक्ष्मपर्यन्तम् निरुपभोगं भावैः अधिवासितं संसरति ।

यदा लोका अनुत्पन्नाः[3] प्रधानादिसर्गे तदा सूक्ष्मशरीरमुत्पन्नमिति ।

किं चान्यत्, **असक्तम्** । न संयुक्तं तिर्यग्योनिदेवमानुषस्थानेषु, सूक्ष्मत्वात् कुत्रचिदसक्तं, पर्वतादिष्वप्रतिहतप्रसरं **संसरति**[4] गच्छति ।

**नियतं**, नित्यम् । यावन्न ज्ञानमुत्पद्यते तावत्संसरति ।

तच्च **महदादिसूक्ष्मपर्यन्तम्** । महानादौ यस्य तन्महदादि, बुद्धिरहङ्कारो मन इति पञ्च तन्मात्राणि । सूक्ष्मपर्यन्तं तन्मात्रपर्यन्तं संसरति शूलग्रहपिपीलिकावत् त्रीनपि लोकान् ।

---

१. वि०—सरति । ब०—पुस्तकपाठः ।
२. ब०— पुस्तकपाठः । वि०— निवर्त्त्य ।
३. वि०—लोकानुपपन्नः ।
४. वि०— सरति ।
५. वि०— पुस्तके केवलं 'नित्यं' इति । ब०— पुस्तके केवलं 'नियतं' इति ।



**निरुपभोगम्** । भोगरहितम् । तत् सूक्ष्मशरीरं पितृमातृजेन[1] बाह्येनोपचयेन क्रियाधर्मग्रहणात् भोगेषु समर्थं भवतीत्यर्थः ।

**भावैरधिवासितम्** । पुरस्ताद्भावान् धर्मादीन् वक्ष्यामः, तैरधिवासितमुपरञ्जितम् ।

**लिङ्ग**मिति । प्रलयकाले महदादिसूक्ष्मपर्यन्तं करणोपेतं प्रधाने लीयते । असंसरणयुक्तं सत् आसर्गकालमत्र वर्तते, प्रकृतिमोहबन्धनबद्धं सत् संसरणादिक्रियास्वसमर्थमिति । पुनः सर्गकाले संसरति तस्मात् लिङ्गं सूक्ष्मम् ॥ ४० ॥

---

किंप्रयोजनेन त्रयोदशविधं करणं संसरतीत्येवं चोदिते सत्याह—

**चित्रं यथाश्रयमृते स्थाण्वादिभ्यो यथा विना छाया ।**
**तद्वद्विनाऽविशेषैः[2] न तिष्ठति निराश्रयं लिङ्गम् ॥ ४१ ॥**

**४१ अन्वयः** ।—यथा आश्रयं ऋते चित्रं न ( तिष्ठति ), यथा स्थाण्वादिभ्यः विना छाया ( न तिष्ठति ), तद्वत् अविशेषैः विना निराश्रयं लिङ्गं न तिष्ठति ।

**चित्रं यथा** कुड्याश्रय**मृते न तिष्ठति, स्थाण्वादिभ्यः** कीलकादिभ्यो **विना छाया** न तिष्ठति, तैर्विना न भवति । आदिग्रहणाद्यथा शैत्यं विना नापो भवन्ति शैत्यं वाऽद्भिर्विना, अग्निरुष्णं विना, वायुः स्पर्शं विना, आकाशमवकाशं विना, पृथिवी गन्धं विना, तद्वत् । एतेन दृष्टान्तेन न्यायेन **विनाऽविशेषैः** अविशेषैस्तन्मात्रैर्विना न तिष्ठति । अथ विशेषभूतानि[3] उच्यन्ते, शरीरं पञ्चभूतमयं वैशेषिणा शरीरेण विना क्व लिङ्गस्थानं चेति, क्व एकदेहमुज्झति तदेवान्यमाश्रयति ।

**निराश्रयम्** । आश्रयरहितं लिङ्गं, त्रयोदशविधं करणमित्यर्थः ॥ ४१ ॥

---

१. ब०—पितामातृजेन ।
२. भाष्यमाठरजयमङ्गलासंमतः पाठः । मूले, वाचस्पतेश्च विशेषैः इति पाठः ।
३. 'विशेषा भूतानि' इति पठनीयम् ?

किमर्थं तदुच्यते--

**पुरुषार्थहेतुकमिदं निमित्तनैमित्तिकप्रसङ्गेन ।**
**प्रकृतेर्विभुत्वयोगात् नटवद्व्यवतिष्ठते लिङ्गम् ॥ ४२ ॥**

**४२ अन्वयः** ।--पुरुषार्थहेतुकमिदं लिङ्गं निमित्तनैमित्तिकप्रसङ्गेन प्रकृतेः विभुत्वयोगात् नटवत् व्यवतिष्ठते ।

**पुरुषार्थः** कर्तव्य इति प्रधानं प्रवर्तते । स च द्विविधः—शब्दाद्युपलब्धिलक्षणो गुणपुरुषान्तरोपलब्धिलक्षणश्च । शब्दाद्युपलब्धिर्ब्रह्मादिलोकेषु गन्धादिभोगावाप्तिः, गुणपुरुषान्तरोपलब्धिर्मोक्ष इति । तस्मादुक्तं **पुरुषार्थहेतुकमिदं** सूक्ष्मशरीरं प्रवर्तत इति ।

**निमित्तनैमित्तिकप्रसङ्गेन** । निमित्तं धर्मादि, नैमित्तिकं, ऊर्ध्वगमनादि पुरस्तादेव वक्ष्यामः । प्रसङ्गेन, प्रसक्त्या ।

**प्रकृतेः** प्रधानस्य **विभुत्वयोगात्** । यथा राजा स्वराष्ट्रे विभुत्वात् यद्यदिच्छति तत्तत् करोतीति, तथा प्रकृतेः[1] सर्वत्र विभुत्वयोगात् निमित्तनैमित्तिकप्रसङ्गेन **व्यवतिष्ठते**, पृथक् पृथग्देहधारणे लिङ्गस्य व्यवस्थां करोति ।

**लिङ्गं**, सूक्ष्मैः परमाणुभिस्तन्मात्रैरुपचितं शरीरं त्रयोदशविधकरणोपेतं मानुषदेवतिर्यग्योनिषु व्यवतिष्ठते । कथं--**नटवत्** । यथा नटः पटान्तरेण प्रविश्य देवो भूत्वा निर्गच्छति, पुनर्मानुषः, पुनर्विदूषकः, एवं लिङ्गं निमित्तनैमित्तिकप्रसङ्गेनोदरान्तः प्रविश्य हस्ती, स्त्री, पुमान् भवति ॥ ४२ ॥

---

भावैरधिवासितं लिङ्गं संसरतीत्युक्तं, तत् के भावा इत्याह--

**सांसिद्धिकाश्च भावाः प्राकृतिका वैकृतिकाश्च[2] धर्माद्याः ।**
**दृष्टाः करणाश्रयिणः कार्याश्रयिणश्च कललाद्याः ॥ ४३ ॥**

**४३ अन्वयः** ।--सांसिद्धिकाश्च प्राकृतिकाः ( च ) वैकृतिकाश्च भावा धर्माद्याः करणाश्रयिणः दृष्टाः । कललाद्याश्च कार्याश्रयिणः ( दृष्टाः ) ।

१. ' प्रकृतेः ' इति पठनीयम् ?
२. भाष्यानुरोधेन ' प्राकृता वैकृताश्च ' इति पठनीयम् । ज०-वैकृताश्च ।



**भावास्त्रिविधाश्चिन्त्यन्ते—सांसिद्धिकाः प्राकृता वैकृताश्च** । तत्र सांसिद्धिका यथा भगवतः कपिलस्यादिसर्गे उत्पद्यमानस्य चत्वारो भावाः सहोत्पन्नाः— धर्मः, ज्ञानं, वैराग्यं, ऐश्वर्यमिति । **प्राकृताः** कथ्यन्ते—ब्रह्मणश्चत्वारः पुत्राः सनकसनन्दनसनातनसनत्कुमारा बभूवुः । तेषामुत्पन्नकार्यकारणानां शरीरिणां षोडशवर्षाणां एते भावाश्चत्वारः समुत्पन्नाः, तस्मादेते प्राकृताः । तथा **वैकृता** यथा—आचार्यमूर्त्तिं निमित्तं कृत्वा अस्मदादीनां ज्ञानमुत्पद्यते, ज्ञानाद्वैराग्यं, वैराग्याद्धर्मः, धर्मादैश्वर्यमिति । आचार्यमूर्तिरपि विकृतिरिति तस्माद्वैकृता एते भावा उच्यन्ते, यैरधिवासितं लिङ्गं संसरति । एते चत्वारो भावाः सात्त्विकाः । तामसाः विपरीताः, 'सात्त्विकमेतद्रूपं तामसमस्माद्विपर्यस्तम्' इत्यत्र व्याख्याताः । एवमष्टौ-धर्मः, ज्ञानं, वैराग्यं, ऐश्वर्यं, अधर्मः, अज्ञानं, अवैराग्यं, अनैश्वर्यमिति ।

अष्टौ भावाः क्व वर्तन्ते - **दृष्टाः करणाश्रयिणः** । बुद्धिः करणं तदाश्रयिणः । एतदुक्तं--' अध्यवसायो बुद्धिर्धर्मो ज्ञानम् ' इति ।

**कार्यं** देहस्तदाश्रयाः **कललाद्याः**, ये मातृजा इत्युक्ताः । शुक्रशोणितसंयोगे विवृद्धिहेतुकाः कललाद्या बुद्बुदमांसपेशीप्रभृतयः, तथा कौमारयौवनस्थविरत्वादयो भावाः, अन्नपानरसनिमित्ताः निष्पद्यन्ते । अतः कार्याश्रयिण उच्यन्ते अन्नादिविषयभोगनिमित्ता जायन्ते ॥ ४३ ॥

---

निमित्तनैमित्तिकप्रसङ्गेनेति यदुक्तमत्रोच्यते--

**धर्मेण गमनमूर्ध्वं गमनमधस्ताद् भवत्यधर्मेण ।**
**ज्ञानेन चापवर्गो विपर्ययादिष्यते बन्धः ॥ ४४ ॥**

**४४ अन्वयः** ।--धर्मेण ऊर्ध्वं गमनम् अधर्मेण अधस्तात् गमनं भवति । ज्ञानेन अपवर्गः विपर्ययात् बन्धश्च इष्यते ।

**धर्मेण गमनमूर्ध्वम्** । धर्मं निमित्तं कृत्वा ऊर्ध्वं उपयाति[1] । ऊर्ध्वमित्यष्टौ स्थानानि गृह्यन्ते । तद्यथा--ब्राह्मं, प्राजापत्यं, सौम्यं, ऐन्द्रं, गान्धर्वं, राक्षसं, पैशाचमिति । तत् सूक्ष्मशरीरं गच्छति । पशुमृगपक्षिसरीसृपस्थावरान्तेष्वधर्मो निमित्तम् ।

१. वि०-उपनयति ।

किं च, **ज्ञानेन चापवर्गः** । अपवर्गः[1] च पञ्चविंशतितत्त्वज्ञानम् । तेन निमित्तेनापवर्गो मोक्षः । ततः सूक्ष्मशरीरं निवर्तते, परमात्मा उच्यते ।

**विपर्ययादिष्यते बन्धः** । अज्ञानं निमित्तम् । स चैव नैमित्तिकः प्राकृतो वैकारिको दाक्षिणिकश्च बन्धः इति वक्ष्यति पुरस्तात् । यदिदमुक्तम्—

प्राकृतेन च बन्धेन तथा वैकारिकेण च ।
दाक्षिणेन[2] तृतीयेन बद्धो नान्येन मुच्यते ॥ ४४ ॥

---

तथाऽन्यदपि निमित्तम्—

**वैराग्यात् प्रकृतिलयः संसारो भवति राजसाद्रागात् ।**
**ऐश्वर्यादविघातो विपर्ययात् तद्विपर्यासः ॥ ४५ ॥**

**४५ अन्वयः** ।—वैराग्यात् प्रकृतिलयः ( भवति ) । राजसात् रागात् संसारः भवति । ऐश्वर्यात् अभिघातः ( भवति ) विपर्ययात् तद्विपर्यासः ( च भवति ) ।

यथा कस्यचिद्वैराग्यमस्ति न तत्त्वज्ञानम् । तस्मात् अज्ञानपूर्वाद् **वैराग्यात् प्रकृतिलयः**, मृतोऽष्टासु प्रकृतिषु प्रधानबुद्ध्यहङ्कारतन्मात्रेषु लीयते न मोक्षः । ततो भूयोऽपि संसरति ।

तथा योऽयं[3] राजसो रागः—यजामि, दक्षिणां ददामि, येनामुष्मिँल्लोकेऽत्र यद्दिव्यं मानुषं सुखमनुभवामि—एतस्मात् **राजसात् रागात् संसारो भवति** ।

तथा **ऐश्वर्यादविघातः** । एतदैश्वर्यं, अष्टगुणमणिमादियुक्तम् । तस्मादैश्वर्यनिमित्तात् अविघातो नैमित्तिको भवति, ब्राह्मादिषु स्थानेष्वैश्वर्यं न विहन्यते ।

किं चान्यत्, **विपर्ययात्** विपर्यासः । तस्याविघातस्य **विपर्यासो** विघातः भवति । अनैश्वर्यात् सर्वत्र विहन्यते ॥ ४५ ॥

---

१. ब०-पुस्तक उपलब्धम् । वि०-पुस्तके नास्ति ।
२. वि०-दक्षिणाभिः ।
३. 'अपि संसरति । तथा यः' इयान् पाठो ब०-पुस्तके नास्ति ।



एष निमित्तैः सह नैमित्तिकः षोडशविधो व्याख्यातः, स किमात्मक इत्याह—

**एष प्रत्ययसर्गो विपर्ययाशक्तितुष्टिसिद्ध्याख्यः[1] ।**
**गुणवैषम्यविमर्देन[2] तस्य[3] भेदास्तु पञ्चाशत् ॥ ४६ ॥**

**४६ अन्वयः** ।—विपर्ययाशक्तितुष्टिसिद्ध्याख्यः एष प्रत्ययसर्गः । तस्य च गुणवैषम्यविमर्दात् भेदास्तु पञ्चाशत् भवन्ति ।

यथा एष षोडशविधो निमित्तनैमित्तिकभेदः[4] व्याख्यातः, **एष प्रत्ययसर्ग** उच्यते । प्रत्ययो बुद्धिरित्युक्ता, 'अध्यवसायो बुद्धिर्धर्मो ज्ञानम्' इत्यादि ।

स च प्रत्ययसर्गश्चतुर्धा भिद्यते—**विपर्ययाशक्तितुष्टिसिद्ध्याख्यभेदात्** । तत्र संशयोऽज्ञानं विपर्ययः[5] । यथा कस्यचित् स्थाणुदर्शने स्थाणुरयं पुरुषो वेति संशयः । अशक्तिर्यथा—तमेव स्थाणुं सम्यग्दृष्ट्वा संशयं छेत्तुं न शक्नोतीत्यशक्तिः । एवं तृतीयस्तुष्ट्याख्यो यथा—तमेव स्थाणुं ज्ञातुं संशयितुं वा नेच्छति, किमनेनास्माकमित्येषा तुष्टिः । चतुर्थः सिद्ध्याख्यो यथा—आनन्दितेन्द्रियः स्थाणुमारूढां वल्लिं पश्यति शकुनिं वा, तस्य सिद्धिर्भवति स्थाणुरयमिति ।

एवमस्य चतुर्विधस्य प्रत्ययसर्गस्य **गुणवैषम्यविमर्देन**[6] **तस्य भेदास्तु पञ्चाशत्** । योऽयं सत्त्वरजस्तमोगुणानां वैषम्यो विमर्दः, तेन तस्य प्रत्ययसर्गस्य पंचाशद्भेदा भवन्ति । तथा क्वापि सत्त्वमुत्कटं भवति रजस्तमसी उदासीने, क्वापि रजः, क्वापि तम इति ॥ ४६ ॥

---

१. वि० -पुस्तकमूले भाष्ये च '°सिद्धाख्यः' । ब०-पुस्तके तु 'सिद्ध्याख्यः' इति भाष्य उपलभ्यते। अयमेव पाठो माठरवाचस्पत्योः संमतः।
२. वि०-पुस्तकमूले '°मर्दात्'। जयमङ्गलायां, माठरवृत्तौ, भाष्ये च '°मर्देन'।
३. विहाय वि०-पुस्तकमूलं, वाचस्पतिमूलं च, सर्वत्रान्यत्र 'तस्य' इत्येतदनन्तरं 'च' इत्यधिकमुपलभ्यते।
४. वि०-°नैमित्तभेदः ।
५. 'विपर्ययः' इति वि० -पुस्तके नास्ति ।
६-मम पाठः । वि०-पुस्तके तु-'°मर्दे'।

भेदाः कथ्यन्ते--

**पञ्च विपर्ययभेदा भवन्त्यशक्तिश्च करणवैकल्यात्।**
**अष्टाविंशतिभेदा तुष्टिर्नवधाऽष्टधा सिद्धिः ॥ ४७ ॥**

४७ **अन्वयः** ।— विपर्ययभेदाः पञ्च भवन्ति, करणवैकल्यात् अशक्तिस्तु अष्टाविंशतिभेदा। तुष्टिः नवधा। सिद्धिः अष्टधा ( भवति )।

**पञ्च विपर्ययभेदाः**। ते यथा--तमः, मोहः, महामोहः, तामिस्रः, अन्धतामिस्र इति। एषां भेदानां नानात्वं वक्ष्यतेऽनन्तरमेवेति।

**अशक्तेस्त्वष्टाविंशतिः भेदा** भवन्ति, **करणवैकल्यात्**। तानपि वक्ष्यामः।

तथा च **तुष्टिर्नवधा**। ऊर्ध्वस्रोतसि राजसानि ज्ञानानि।

तथा **अष्टविधा सिद्धिः**। सात्त्विकानि ज्ञानानि तत्रैवोर्ध्वस्रोतसि। एतत् क्रमेणैव वक्ष्यते ॥ ४७ ॥

---

तत्र विपर्ययभेदा उच्यन्ते--

**भेदस्तमसोऽष्टविधो मोहस्य च, दशविधो महामोहः।**
**तामिस्रोऽष्टादशधा, तथा भवत्यन्धतामिस्रः ॥ ४८ ॥**

४८ **अन्वयः** ।-- तमसः भेदः अष्टविधः मोहस्य च ( अष्टविधः भेदः ) महामोहः दशविधः। तामिस्रः अष्टादशधा ( भवति )। तथा अन्धतामिस्रः ( अष्टादशधा भवति )।

**तमसस्तावदष्टधा भेदः**। प्रलयः[1] अज्ञानात् विभज्यते। सोऽष्टासु प्रकृतिषु लीयते, प्रधानबुद्ध्यहङ्कारपञ्चतन्मात्राष्टासु। तत्र लीनमात्मानं मन्यते मुक्तोऽहमिति, तमोभेद एषः।

अष्टविधस्य मोहस्य भेदोऽष्टविध एवेत्यर्थः। यत्राष्टगुणमैश्वर्यं तत्र सङ्गादिन्द्रादयो देवा न मोक्षं प्राप्नुवन्ति। पुनश्च तत्क्षये ससरन्त्येषोऽष्टविधो मोह इति।

१. 'मलः' इति पठनीयम् ?। अत्र माठरवृत्तिर्द्रष्टव्या। तमसः पर्यायवाची मलशब्दः।



**दशविधो महामोहः**। शब्दस्पर्शरूपरसगन्धा देवानामेते पञ्च विषयाः सुखलक्षणाः मानुषाणामप्येत एव शब्दादयः पञ्च विषयाः। एवमेतेषु दशसु महामोह इति।

**तामिस्रोऽष्टादशधा**[1]। अष्टविधमैश्वर्यं, दृष्टानुश्रविका विषया दश, एतेषामष्टादशानां सम्पदमनुनन्दन्ति विपदं नानुमोदन्त्येषोऽष्टादशविधो विकल्पस्तामिस्रः।

तथा तामिस्रमष्टगुणमैश्वर्यं, दृष्टानुश्राविका दश विषयाः, **तथाऽन्धतामिस्रो**ऽप्यष्टादशभेद एव। किन्तु विषयसम्पत्तौ सम्भोगकाले य एव म्रियते, अष्टगुणैश्वर्याद्वा भ्रश्यते, ततस्तस्य महद्दुःखमुत्पद्यते, सोऽन्धतामिस्र इति। एवं विपर्ययभेदास्तमःप्रभृतयः पञ्च प्रत्येकं भिद्यमानाः द्विषष्टिभेदाः संवृत्ता इति ॥ ४९ ॥

---

अशक्तिभेदाः कथ्यन्ते--

**एकादशेन्द्रियवधाः सह बुद्धिवधैरशक्तिरुद्दिष्टा।**
**सप्तदश वधा बुद्धेर्विपर्ययात् तुष्टिसिद्धीनाम् ॥ ४९ ॥**

४९ **अन्वयः** ।--बुद्धिवधैः सह एकादश इन्द्रियवधाः अशक्तिः उद्दिष्टा। तुष्टिसिद्धीनां विपर्ययात् बुद्धेः सप्तदश वधाः ( भवन्ति )।

'भवन्त्यशक्तेश्च करणवैकल्यादष्टाविंशतिभेदाः'[2] इत्युद्दिष्टम्। तत्र **एकादशेन्द्रियवधाः**--बाधिर्यम्, अन्धता, प्रसुप्तिः, उपजिह्विका[3], घ्राणपाकः, मूकता, कुणित्वं, खाञ्ज्यं, गुदावर्तः, क्लैब्यं, उन्माद इति।

**सह बुद्धिवधैरशक्तिरुद्दिष्टा**। ये बुद्धिवधास्तैः सह अशक्तेरष्टाविंशतिभेदा भवन्ति।

**सप्तदश वधा बुद्धेः**। सप्तदश वधास्ते तुष्टिभेदासिद्धिभेदवैपरीत्येन।

१. 'अष्टादशधा' इति ब०-पुस्तके नास्ति।
२. ब०-टिप्पणी- 'पूर्वकारिकायामशक्तेरिति षष्ठ्यन्तोऽष्टाविंशतिभेदाः इति प्रथमाबहुवचनान्तश्च पाठ एतद्व्याख्यात्रभिप्रेतः, पूर्वत्रापि तथैव व्याख्यातत्वात्'।
३. वि०-उपजिह्विका।

तुष्टिभेदा नव, सिद्धिभेदा अष्टौ ये ते, विपरीतैः सह एकादश वधाः[1], एवमष्टाविंशतिविकल्पा अशक्तिरिति ॥ ४९ ॥

**विपर्ययात् तुष्टिसिद्धीनामेव**[2] भेदक्रमो द्रष्टव्यः। तत्र तुष्टिर्नवधा कथ्यते।

**आध्यात्मिकाश्चतस्रः प्रकृत्युपादानकालभाग्याख्याः।**
**बाह्या विषयोपरमात् पञ्च, नव तुष्टयोऽभिहिताः**[3] ॥ ५० ॥

५० **अन्वयः** ।—आध्यात्मिक्यः ( तुष्टयः ) प्रकृत्युपादानकालभाग्याख्याः चतस्रः। विषयोपरमात् बाह्याः पञ्च ( इति ) नव तुष्टयः अभिहिताः।

**आध्यात्मिकाश्चतस्रः** तुष्टयः। अध्यात्मनि भवा आध्यात्मिकाः, ताश्च **प्रकृत्युपादानकालभाग्याख्याः**। तत्र प्रकृत्याख्या—यथा कश्चित् प्रकृतिं वेत्ति तस्याः सगुणत्वनिर्गुणत्वं च, तेन तत्त्वं तत्कार्यं विज्ञायैव केवलं तुष्टस्तस्य नास्ति मोक्षः,—एषा प्रकृत्याख्या। उपादानाख्या—यथा कश्चिदविज्ञायैव तत्त्वान्युपादानग्रहणं करोति, त्रिदण्डकमण्डलुविविदिकाभ्यः[4] मोक्ष इति, तस्यापि नास्ति मोक्ष इति[5] एषा उपादानाख्या। तथा कालाख्या—कालेन मोक्षो भविष्यतीति किं तत्त्वाभ्यासेन, इत्येषा कालाख्या तुष्टिः, तस्य नास्ति मोक्ष इति। तथा भाग्याख्या—भाग्येनैव मोक्षो भविष्यतीति भाग्याख्या। चतुर्धा तुष्टिरिति।

**बाह्या विषयोपरमाच्च पञ्च**। बाह्यास्तुष्टयः पञ्च विषयोपरमात्। शब्दस्पर्शरूपरसगन्धेभ्य उपरतोऽर्जनरक्षणक्षयसंगहिंसादर्शनात्। वृद्धिनिमित्तं पाशुपाल्यवाणिज्यप्रतिग्रहसेवाः कार्याः, एतदर्जनं दुःखम्। अर्जितानां रक्षणे दुःखम्। उपभोगात् क्षीयत इति क्षयदुःखम्। तथा विषयोपभोगसंगे कृते नास्तीन्द्रियाणामुपशम इति सङ्गदोषः। तथा नाऽनुपहत्य भूतान्युपभोग इति हिंसादोषः। एवमर्जनादिदोषदर्शनात् पञ्चविषयोपरमात् पञ्च तुष्टयः।

१. वि०-°दशविधाः।
२. वि०-सिद्धितुष्टीनामेव।
३. वा०-°भिमताः।
४. ब-°विविदिषाभ्यः। संशयितोऽत्र पाठः।
५. 'मोक्ष इति' इति वि०-पुस्तके नास्ति।



एवमाध्यात्मिकबाह्यभेदात् **नव तुष्टयः**। तासां नामानि शास्त्रान्तरे प्रोक्तानि—अंभः, सलिलम्, ओघः, वृष्टिः, सुतमः, पारम्, सुनेत्रम्, नारीकम्, अनुत्तमाम्भसिकमिति। आसां तुष्टीनां विपरीता अशक्तिभेदाद् बुद्धिवधा भवन्ति। तद्यथा—अनम्भः, असलिलम्, अनोघ इत्यादिवैपरीत्याद् बुद्धिवधा इति ॥ ५० ॥

---

सिद्धिरुच्यते—

**ऊहः शब्दोऽध्ययनं दुःखविघातास्त्रयः सुहृत्प्राप्तिः।**
**दानं च सिद्धयोऽष्टौ सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः** ॥ ५१ ॥

५१ **अन्वयः** ।—ऊहः शब्दः अध्ययनं त्रयः दुःखविघाताः सुहृत्प्राप्तिः दानं च ( इति ) अष्टौ सिद्धयः। सिद्धेः पूर्वः त्रिविधः अङ्कुशः।

**ऊहो** यथा कश्चिन्नित्यमूहते—किमिह सत्यं, किं परं, किं नैःश्रेयसं, किं कृत्वा[1] कृतार्थः स्याम्—इति चिन्तयतो ज्ञानमुत्पद्यते प्रधानादन्य एव पुरुष इति, अन्या बुद्धिः, अन्योऽहङ्कारः, अन्यानि तन्मात्राणीन्द्रियाणि पञ्च महाभूतानीत्येवं तत्त्वज्ञानमुत्पद्यते येन मोक्षो भवति। एषा ऊहाख्या प्रथमा सिद्धिः।

तथा शब्दज्ञानात् प्रधानपुरुषबुद्ध्यहङ्कारतन्मात्रेन्द्रियपञ्चमहाभूतविषयं ज्ञानं भवति, ततो मोक्ष इत्येषा शब्दाख्या सिद्धिः।

**अध्ययनाद्** वेदादिशास्त्राध्ययनात् पञ्चविंशतितत्त्वज्ञानं प्राप्य मोक्षं याति[2], इत्येषा तृतीया सिद्धिः।

**दुःखविघातत्रयम्**[3]। आध्यात्मिकाधिभौतिकाधिदैविकदुःखत्रयविघाताय गुरुं समुपगम्य तत उपदेशान्मोक्षं याति। एषा चतुर्थी सिद्धिः। एषैव दुःखत्रयभेदात् त्रिधा कल्पनीया। इति षट् सिद्धयः।

तथा **सुहृत्प्राप्तिः**। यथा कश्चित् सुहृज्ज्ञानमधिगम्य मोक्षं गच्छति। एषा सप्तमी सिद्धिः।

१. 'कृत्वा' इति वि०- पुस्तके नास्ति।
२. ब०-प्राप्यते। 'मोक्षं याति' इति ब०-पुस्तके नास्ति।
३. एष एव भाष्यसम्मतः पाठ इति प्रतिभाति।

**दानम्** । यथा कश्चिद्भगवतां प्रत्याश्रयौषधित्रिदण्डकुण्डिकादीनां ग्रासाच्छादनादीनां च दानेनोपकृत्य, तेभ्यो ज्ञानमवाप्य मोक्षं याति । एषा अष्टमी सिद्धिः ।

आसामष्टानां सिद्धीनां शास्त्रान्तरे संज्ञाः कृताः——तारम्, सुतारम्, तारतारम्, प्रमोदम्, प्रमुदितम्, प्रमोदमानम्, रम्यकम्, सदाप्रमुदितमिति । आसां विपर्ययात् बुद्धेर्वधा ये विपरीतास्त अशक्तौ निक्षिप्ताः । यथा—अतारम्, असुतारम्, अतारतारम्—इत्यादि द्रष्टव्यम् ।

अशक्तिभेदा अष्टाविंशतिरिरुक्ताः । ते–सहबुद्धिवधैरेकादशेन्द्रियवधा इति । तत्र तुष्टिविपर्यया नव, सिद्धीनां विपर्यया अष्टौ——एवमेते सप्तदश बुद्धिवधाः । एतैः सहेन्द्रियवधाः, अष्टाविंशतिरशक्तिभेदाः पश्चात् कथिता इति विपर्ययाशक्तितुष्टिसिद्धीनामेवोद्देशो निर्देशश्च कृत इति ।

किं चान्यत्, **सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः** । सिद्धेः पूर्वा या विपर्ययाशक्तितुष्टयस्ता एव सिद्धेरङ्कुशः, तद्भेदादेव त्रिविधः । यथा हस्ती गृहीताङ्कुशेन वशो भवति, एवं विपर्ययाशक्तितुष्टिभिर्गृहीतो लोकोऽज्ञानं प्राप्नोति । तस्मादेताः परित्यज्य सिद्धिः सेव्या । ससिद्धेस्तत्त्वज्ञानमुत्पद्यते । तस्मात्[1] मोक्ष इति ॥ ५१ ॥

---

अथ यदुक्तं " भावैरधिवासितं लिङ्गम् " तत्र भावा धर्मादयोऽष्टावुक्ता बुद्धिपरिणामाः, विपर्ययाशक्तितुष्टिसिद्धिपरिणताः । स भावाख्यः प्रत्ययसर्गः । लिङ्गं च तन्मात्रसर्गश्चतुर्दशभूतपर्यन्त उक्तः । तत्रैकेनैव सर्गेण पुरुषार्थसिद्धौ किमुभयविधसर्गेणेत्यत आह——

**न विना भावैर्लिङ्गं न लिङ्गेन भावनिर्वृत्तिः ।**
**लिङ्गाख्यो भावाख्यस्तस्माद् द्विविधः प्रवर्तते सर्गः ॥ ५२ ॥**

**५२ अन्वयः** ।——भावैः विना लिङ्गं न, लिङ्गेन विना भावनिर्वृत्तिः न ( भवति ) । तस्मात् लिङ्गाख्यः भावाख्यः ( च ) द्विविधः सर्गः प्रवर्तते ।

---

१. वि०–तत् ।



**भावैः** प्रत्ययसर्गैर्विना लिङ्गं न, तन्मात्रसर्गो न, पूर्वपूर्वसंस्कारादृष्टकारितत्वादुत्तरोत्तरदेहलम्भस्य ।

**लिङ्गेन** तन्मात्रसर्गेण च **विना भावनिर्वृत्तिर्न**, स्थूलसूक्ष्मदेहसाध्यत्वाद्धर्मादेः । अनादित्वाच्च सर्गस्य बीजाङ्कुरवदन्योन्याश्रयो[1] न दोषाय, तत्तज्जातीयापेक्षित्वेऽपि[2] तत्तद्व्यक्तीनां परस्परानपेक्षितत्वात् । **तस्मात् भावाख्यो लिङ्गाख्यश्च द्विविधः प्रवर्तते सर्ग** इति ॥ ५२ ॥

---

किं चान्यत्——

**अष्टविकल्पो दैवस्तैर्यग्योनश्च पञ्चधा भवति ।**
**मानुषश्चैकविधः समासतोऽयं त्रिधा सर्गः[3] ॥ ५३ ॥**

**५३ अन्वयः** ।——दैवः ( सर्गः ) अष्टविकल्पः । तैर्यग्योनश्च (सर्गः) पञ्चधा भवति । मानुषः सर्गश्च एकविधः ( इति ) अयं समासतः भौतिकः सर्गः ।

तत्र **दैवमष्टप्रकारम्**—ब्राह्मं, प्राजापत्यं, सौम्यं, ऐन्द्रं, गान्धर्वं, याक्षं, राक्षसं, पैशाचमिति । पशुमृगपक्षिसरीसृपस्थावराणि भूतानि, एवं पञ्चविधस्तैरश्चः । **मानुषयोनिरेकैव** । इति चतुर्दश भूतानि ॥ ५३ ॥

---

त्रिष्वपि लोकेषु गुणत्रयमस्ति, तत्र कस्मिन् किमधिकमित्युच्यते[4]——

**ऊर्ध्वं सत्त्वविशालस्तमोविशालश्च मूलतः सर्गः ।**
**मध्ये रजोविशालो ब्रह्मादिस्तम्बपर्यन्तः[5] ॥ ५४ ॥**

---

१. वि०–बीजाङ्कुरवदन्योन्याश्रयौ । २. वि०–°पेक्षितत्वेऽपि ।
३. पाठोऽयं जयमङ्गलामाठरवृत्तिवाचस्पतिमिश्रसंमतः । वि०–पुस्तके तु—
अष्टं विकल्पं दैवं तैर्यग्योनं पंचधा भवति ।
मानुष्यं त्वेकविधं समासतोऽयं त्रिधा सर्गः ॥
४. ' वि०–°धिकमुच्यते । मूलधृतः पाठस्तु प्रामादिकः, भाष्यविरोधात् ।
५. ' °पर्यन्तम् ' इति वि०–पुस्तके ।

**५४ अन्वयः** ।––ऊर्ध्वं सत्त्वविशालः सर्गः, मूलतश्च तमोविशालः ( सर्गः ), मध्ये रजोविशालः ( सर्गः ) ( इति ) ब्रह्मादिस्तम्बपर्यन्तः ( सर्गः ) ।

ऊर्ध्वमिति । अष्टसु देवस्थानेषु **सत्त्वविशालः**, सत्त्वविस्तारः, सत्त्वोत्कट ऊर्ध्वसत्त्व इति । तत्रापि रजस्तमसी स्तः ।

**तमोविशालो मूलतः** । पश्वादिषु स्थावरान्तेषु सर्वः सर्गस्तमसाधिक्येन व्याप्तः । तत्रापि सत्त्वरजसी स्तः ।

**मध्ये,** मानुषे[1] **रज** उत्कटम् । तत्रापि सत्त्वतमसी विद्येते । तस्माद् दुःखप्राया मनुष्याः ।

एवं **ब्रह्मादिस्तम्बपर्यन्तः**, ब्रह्मादिस्थावरान्त इत्यर्थः । एवं अभौतिकः सर्गः, लिङ्गसर्गः, भावसर्गः, भूतसर्गः, दैवमानुषतैर्यग्योनाः[2], इत्येष प्रधानकृतः षोडशविधः[3] सर्गः ॥ ५४ ॥

---

**तत्र जरामरणकृतं दुःखं प्राप्नोति चेतनः पुरुषः ।**
**लिङ्गस्याविनिवृत्तेः, तस्माद् दुःखं स्वभावेन ॥ ५५ ॥**

**५५ अन्वयः** ।––तत्र चेतनः पुरुषः लिङ्गस्य अविनिवृत्तेः जरामरणकृतं दुःखं प्राप्नोति । तस्मात् दुःखं स्वभावेन ।

**तत्रेति** । तेषु देवमानुषतिर्यग्योनिषु **जराकृतं मरणकृतं** चैव **दुःखं चेतनः** चैतन्यवान् **पुरुषः प्राप्नोति,** न प्रधानं, न बुद्धिः, नाहङ्कारः, न तन्मात्राणीन्द्रियाणि महाभूतानि च ।

कियन्तं कालं पुरुषो दुःखं प्राप्नोतीति तद्विविनक्ति—**लिङ्गस्याविनिवृत्तेः** । यत्तन्महदादि लिङ्गशरीरेणाविश्य तत्र व्यक्तीभवति तद्यावन्न[4] निवर्तते संसारशरीरमिति तावत्[5] संक्षेपेण त्रिषु स्थानेषु पुरुषो जरामरणकृतं दुःखं प्राप्नोति **लिङ्गस्याविनिवृत्तेः**, लिङ्गस्य विनिवृत्तिं यावत् । लिङ्गनिवृत्तौ मोक्षः, मोक्षप्राप्तौ नास्ति दुःखमिति । तत्पुनः केन निवर्तते, यदा पञ्चविंशति-

१. वि०–मानुष्ये ।
२. वि०–°तैर्यग्योनयः ।
३. वि०–षोडशः ।
४. वि०–तद्यावत् ।
५. एतत् वि०–पुस्तके नास्ति ।



तत्त्वज्ञानं स्यात् सत्त्वपुरुषान्यताख्यातिलक्षणं– इदं प्रधानं, इयं बुद्धिः, अयमहङ्कारः, इमानि पञ्च महाभूतानि, येभ्योऽन्यः पुरुषो विसदृश इति । एवं ज्ञानाल्लिङ्गनिवृत्तिस्ततो मोक्ष इति ॥ ५५ ॥

---

प्रकृतेः किंनिमित्त आरम्भः[1] इत्युच्यते—

**इत्येष प्रकृतिकृतौ[2] महदादिविशेषभूतपर्यन्तः ।**
**प्रतिपुरुषविमोक्षार्थं स्वार्थ इव परार्थ आरम्भः ॥ ५६ ॥**

**५६ अन्वयः** ।–महदादिविशेषभूतपर्यन्तः इत्येषः प्रकृतिकृतौ आरंभः स्वार्थ इव परार्थः प्रतिपुरुषविमोक्षार्थम् ।

'इत्येषः' परिसमाप्तौ निर्देशे च । **प्रकृतिकृतौ**[3] प्रकृतिकरणे, प्रकृतिक्रियायां य आरम्भो **महदादिविशेषभूतपर्यन्तः**—प्रकृतेर्महान्, महतोऽहङ्कारः, तस्मात्तन्मात्राण्येकादशेन्द्रियाणि, तन्मात्रेभ्यः पञ्च महाभूतानि ––इत्येषः ।

**प्रतिपुरुषविमोक्षार्थम्** । पुरुषं पुरुषं[4] प्रति । देवमनुष्यतिर्यग्भावं गतानां विमोक्षार्थमारम्भः ।

कथं––**स्वार्थ इव परार्थः**[5] **आरम्भः** । यथा कश्चित् स्वार्थं त्यक्त्वा मित्रकार्याणि करोति एवं प्रधानम् । पुरुषोऽत्र प्रधानस्य न किञ्चित् प्रत्युपकारं करोति । स्वार्थ इव न च स्वार्थः, परार्थ एव । अर्थः शब्दादिविषयोपलब्धिर्गुणपुरुषान्तरोपलब्धिश्च । त्रिषु लोकेषु शब्दादिविषयैः पुरुषा योजयितव्याः, अन्ते मोक्षेण––इति प्रधानस्य प्रवृत्तिः । तथा चोक्तम्––'कुम्भवत् प्रधानं पुरुषार्थं कृत्वा निवर्तते' इति ॥ ५६ ॥

---

१. वि०–प्रवृत्तेः किंनिमित्तमारम्भः ।
२. भाष्यसंमतः पाठः वि०–पुस्तकमूले तु 'प्रकृतिकृतो' ।
३. ब०–प्रकृतौ । तत्र टिप्पणी च–'एतन्मते प्रकृतिकृताविति सप्तम्यन्तः पाठः ।'
४. वि०– पुस्तके तु 'पुरुषं' इति शब्दो न द्विरुक्तः ।
५. वि०–परार्थम् ।

अत्रोच्यते—अचेतनं प्रधानं चेतनः पुरुष इति । “ मया त्रिषु लोकेषु शब्दादिभिर्विषयैः पुरुषो योज्योऽन्ते मोक्षः कर्तव्यः ” इति कथं चेतनवत् प्रवृत्तिः । सत्यम्, किन्त्वचेतनानामपि प्रवृत्तिर्दृष्टा निवृत्तिश्च यस्मादित्याह—

**वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य ।**
**पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य ॥ ५७ ॥**

**५७ अन्वयः ।**—यथा अज्ञस्य क्षीरस्य वत्सविवृद्धिनिमित्तं प्रवृत्तिः तथा प्रधानस्य पुरुषविमोक्षनिमित्तं प्रवृत्तिः ( भवति ) ।

यथा तृणादिकं[1] गवा भक्षितं क्षीरभावेन परिणम्य वत्सविवृद्धिं करोति, पुष्टे च वत्से निवर्तते, एवं **पुरुषविमोक्षनिमित्तं** प्रधानमित्यज्ञस्य[2] **प्रवृत्तिरिति** ॥ ५७ ॥

किं च—

**औत्सुक्यनिवृत्त्यर्थं यथा क्रियासु प्रवर्तते लोकः ।**
**पुरुषस्य विमोक्षार्थं प्रवर्तते तद्वदव्यक्तम् ॥ ५८ ॥**

**५८ अन्वयः ।**—यथा लोकः औत्सुक्यनिवृत्त्यर्थं क्रियासु प्रवर्तते तद्वत् अव्यक्तं पुरुषस्य विमोक्षार्थं प्रवर्तते ।

**यथा** लोकः इष्टौत्सुक्ये सति तस्य **निवृत्त्यर्थं क्रियासु प्रवर्तते** गमनागमनक्रियासु, कृतकार्यो निवर्तते, तथा **पुरुषस्य विमोक्षार्थं** शब्दादिविषयोपभोगलक्षणं गुणपुरुषान्तरोपलब्धिलक्षणं च द्विविधमपि पुरुषार्थं कृत्वा प्रधानं निवर्तते ॥ ५८ ॥

किं चान्यत्—

**रङ्गस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्यात्[4] ।**
**पुरुषस्य तथाऽऽत्मानं प्रकाश्य विनिवर्तते[5] प्रकृतिः ॥ ५९ ॥**

१. ब०–तृणोदकं ।
२. वि०–प्रधानं । अज्ञस्य ।
३. ब०–लोके ।
४. ज०–नृत्तात् ।
५. वा०–पुस्तकपाठः । वि०-पुस्तकमूले तु ‘ निवर्त्तते ’ ।



**५९ अन्वयः ।**—यथा नर्तकी रङ्गस्य दर्शयित्वा नृत्यात् निवर्तते तथा प्रकृतिः पुरुषस्य आत्मानं प्रकाश्य निवर्तते ।

**यथा नर्तकी** शृङ्गारादिरसैः इतिहासादिभावैश्च[1] निबद्धगीतवादित्रवृत्तानि **रङ्गस्य दर्शयित्वा** कृतकार्या **नृत्यान्निवर्तते तथा प्रकृतिरपि पुरुषस्यात्मानं प्रकाश्य** बुद्ध्यहङ्कारतन्मात्रेन्द्रियमहाभूतभेदेन **निवर्तते** ॥५९ ॥

कथं को वा अस्या निवर्तको हेतुस्तदाह—

**नानाविधैरुपायैरुपकारिण्यनुपकारिणः पुंसः ।**
**गुणवत्यगुणस्य सतस्तस्यार्थमपार्थकं चरति ॥ ६० ॥**

**६० अन्वयः ।**—नानाविधैः उपायैः उपकारिणी गुणवती ( प्रकृतिः ) अनुपकारिणः अगुणस्य सतः तस्य पुंसः अर्थम् अपार्थकं चरति ।

**नानाविधैरुपायैः** प्रकृतिः पुरुषस्योप**कारिणी, अनुपकारिणः पुंसः** । कथम्–देवमानुषतिर्यग्भावेन, सुखदुःखमोहात्मकभावेन शब्दादिविषयभावेन ।

एवं नानाविधैरुपायैरात्मानं प्रकाश्य, अहमन्या त्वमन्य इति, निवर्तते । अतो नित्यस्य तस्यार्थं **अपार्थं चरति** कुरुते[2] । यथा कश्चित् परोपकारी सर्वस्योपकुरुते, नात्मनः प्रत्युपकारमीहते, एवं प्रकृतिः पुरुषार्थं चरति[3] करोत्यपार्थकम् ॥ ६० ॥

पश्चादुक्तम्—आत्मानं प्रकाश्य निवर्तते। निवृत्ता च किं करोतीत्याह—

**प्रकृतेः सुकुमारतरं न किञ्चिदस्तीति मे मतिर्भवति ।**
**या दृष्टास्मीति पुनर्न दर्शनमुपैति पुरुषस्य ॥ ६१ ॥**

१. पाठोऽयं भ्रान्त इवाभाति । ‘ विलासादिभावैश्च ’ इति पठनीयम् ? विल्सनमहोदयानुवादस्तु in situations drawn from history or tradition नातिमनोरमः । विलासलक्षणं च भावप्रकाशने पृष्ठे, ६–७ पङ्क्त्योः—

प्रियसङ्गमकाले तु नेत्रभ्रूवक्त्रकर्मणाम् ।
विशेषो यः स विज्ञेयो विलासोऽङ्गक्रियादिषु ॥

२. वि०–कुरुते चरति च ।
३. वि०–कुरुते ।

**६१ अन्वयः** ।—प्रकृतेः सुकुमारतरं किञ्चित् न अस्ति इति मे मतिर्भवति । या दृष्टा अस्मीति पुनः पुरुषस्य दर्शनं न उपैति ।

लोके **प्रकृतेः सुकुमारतरं न किञ्चिदस्तीत्येवं मे मतिर्भवति** येन परार्थ एवं मतिरुत्पन्ना । कस्मात्–अहमनेन पुरुषेण **दृष्टास्मीत्यस्य** पुंसः **पुनर्दर्शनं नोपैति** , पुरुषस्यादर्शनमुपयातीत्यर्थः । तत्र सुकुमारतरं वर्णयति । केचित्[1] ईश्वरं कारणं ब्रुवते—

अज्ञो जन्तुरनीशोऽयमात्मनः[2] सुखदुःखयोः ।
ईश्वरप्रेरितो गच्छेत्स्वर्गं नरकमेव वा ॥

महाभारत—३, ३०, ८८.

अपरे स्वभावकारणका[3] ब्रुवते—

" केन शुक्लीकृता हंसा मयूराः केन चित्रिताः[4] । "

स्वभावेनैव इति । अत्र सांख्याचार्या आहुः, निर्गुणत्वादीश्वरस्य कथं सगुणाः प्रजाः[5] जायेरन् । कथं वा पुरुषान्निर्गुणादेव । तस्मात् प्रकृतेर्युज्यते । यथा शुक्लेभ्यस्तन्तुभ्यः शुक्ल एव पटो भवति, कृष्णेभ्यः कृष्ण एवेति । एवं त्रिगुणात् प्रधानात् त्रयो लोकास्त्रिगुणाः समुत्पन्ना इति गम्यते । निर्गुण ईश्वरः, सगुणानां लोकानां तस्मादुत्पत्तिरयुक्तेति । अनेन पुरुषो व्याख्यातः । तथा केषांचित् कालः कारणमिति, उक्तं च—

१. ' केचित् ' इति वि०-पुस्तके नास्ति ।
२. ब०-पुस्तकसंमतः पाठः । वि०-पुस्तके तु—
अजो जन्तुरनीशोऽयमात्मा नः ।
श्लोकस्यास्योत्तरार्द्धं जयमङ्गलायाम्—
' ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वा । '
३. वि०- स्वाभावकारणिकां । ' स्वभावकारणतां ' इति पठनीयम् ?
४. श्लोकोऽयं सम्पूर्णो माठरवृत्तावुपलभ्यते—
" येन शुक्लीकृता हंसाः शुकाश्च हरितीकृताः ।
मयूराश्चित्रिता येन स नो वृत्तिं विधास्यति ॥ "
५. माठरवृत्तिसंमतः पाठः । वि०-सगुणतः प्रजः । ब०-सगुणतः प्रजाः ।



' कालः पचति[1] भूतानि कालः संहरते जगत्[2] ।
कालः सुप्तेषु जागर्ति कालो हि दुरतिक्रमः[3] ॥ '

व्यक्ताव्यक्तपुरुषाः[4] त्रयः पदार्थाः, तेन कालोऽन्तर्भूतोऽस्ति । स हि[5] व्यक्तः । सर्वकर्तृत्वात् कालस्यापि प्रधानमेव कारणम् । स्वभावोऽप्यत्रैव लीनः । तस्मात् कालो न कारण, नापि स्वभाव इति । तस्मात् प्रकृतिरेव कारणम्, न प्रकृतेः कारणान्तरमस्तीति ।

**न पुनर्दर्शनमुपयाति पुरुषस्य** । अतः **प्रकृतेः सुकुमारतरं** सुभोग्यतरं **न किञ्चिदी**श्वरादिकारण**मस्तीति मे मतिर्भवति** ॥ ६१ ॥—[6]

१. वि०-पचास्ति । मा०-सृजति ।
२. मा०-प्रजाः ।
३. मा०-तस्मात्कालस्तु कारणम् ।
४. वि०-व्यक्तमव्यक्तपुरुषाः ।
५. ' हि ' इति वि०-पुस्तके नास्ति ।

६ —अस्याः कारिकाया अनन्तरमेवान्ययैकया कारिकया भवितव्यमिति स्वर्गतस्य तिलकान्वयजस्य बालगङ्गाधरपण्डितस्य सिद्धान्तः । तत्संक्षेपस्तु—

" ' सप्तत्यां किल येऽर्थाः ' इतीश्वरकृष्णवचनानुरोधेनार्याणां सप्तत्या भाव्यम् । किन्तु गौडपादभाष्ये त्वेकोनसप्ततिरेवोपलभ्यते । भाष्यं चैकषष्टितमाया उपरि नैकस्या अपि तु कारिकयोः । अत एकषष्टितमाया अनन्तरमेवानया लुप्तया कारिकया भाव्यम् । भाष्यगतप्रतीकानुरोधेन चैषा कारिकैवं निर्मातुं शक्यते—

कारणमीश्वरमेके ब्रुवते कालं परे स्वभावं वा ।
प्रजाः कथं निर्गुणतो व्यक्तः कालः स्वभावश्च ॥

अस्ति चास्याः कारिकायाः पूर्वापरसन्दर्भसङ्गतिः । निरीश्वरत्वप्रतिपादकत्वाच्च केनचिदसहिष्णुना च्यावितेयम् । किन्तु भाष्यच्यावनमसौ विस्मृतवान् । पूर्वेषां मते स्वभावस्य, कालस्य, ईश्वरस्य वा जगन्मूलत्वमिति श्वेताश्वतरमन्त्रेण द्योत्यते—

स्वभावमेके कवयो वदन्ति कालं तथान्ये परिमुह्यमानाः ।
देवस्यैष महिमा तु लोके येनेदं भ्राम्यते ब्रह्मचक्रम् ॥ " इति ।

अस्या नष्टायाः कारिकायाः पूर्वार्द्धमस्मन्मतानुसारेण त्वेवं पठनीयम्—

' कारणमीश्वरमेके पुरुषं कालं परे स्वभावं वा । '

यत्तु सूर्यनारायणशास्त्रिणाऽनन्तरोक्तः पाठस्तिलकपण्डितस्येत्युक्तं तद्भ्रममूलकमेव । पाठश्चायमस्माभिः सोपपत्ति स्वलेखे प्रतिपादितस्तत्रैव सविस्तरो द्रष्टव्यः ।

('Jayamaṅgalā and other commentaries on the Sāṅkhya-saptati of Īśvarakṛṣṇa'--Proceedings of the Fifth Indian Oriental Conference, Vol. II., p. 1030, Note 1. )

सूर्यनारायणशास्त्रिणा च कृतमेतत्कारिकाखण्डनं न सयुक्तिकम् । तन्मतानुरोधे-नैकषष्टितमकारिकाया भाष्यस्यान्तिमे कृतः, वृत्तौ च माठरेण कृतः सुकुमारतर-मितिशब्दस्य परामर्शः, प्रकृतकारिकां विहायान्यस्याः कारिकाया भाष्यवृत्त्योः सम्भावनां निराकरोति । एतदत्र विचारणीयम्—

भाष्यस्यादिमे भाग एवं पठ्यते—'अहमनेन पुरुषेण दृष्टाऽस्मीत्यस्य पुंसः पुन-र्दर्शनं नोपैति, पुरुषस्यादर्शनमुपयातीत्यर्थः । तत्र सुकुमारतरं वर्णयति—'एतदनन्तरं भाष्यचरमभागः—'न पुनर्दर्शनमुपयाति पुरुषस्य' इति पठनीयः । 'सुकुमारतरं वर्ण-यति' इत्यनन्तरं 'केचिदीश्वरं कारणं ब्रुवते' इत्यादिपाठस्तु नितरामसङ्गत एव । नहीश्वरादीनां कारणत्वं प्रकृतेः सुकुमारतरत्ववर्णनम् । अतो ध्रुवं केनचिदीश्वरनिरासासहिष्णुना कारिकेयं लोपिता । अन्येन च केनचिद्द्राकेण भाष्यमेतन्मूलकारिकाविहीनमिति मत्वा तथैकषष्टितमकारिकाभाष्यान्तर्निवेशितं यथा स्थूलदर्शनैरपि विभाव्यते । अत एव 'न पुनर्दर्शनमुपयाति पुरुषस्य ' इत्येतदनन्तरं तेन 'अतः प्रकृतेः सुकुमारतरं सुभोग्यतरं न किञ्चिदीश्वरादिकारणमस्तीति मे मतिर्भवति ' इति सङ्गत्यर्थं प्रक्षिप्तम् । यथा च नैतत्सङ्गच्छते तथा स्फुटमेव । परं च, ईश्वरादीनां सुभोग्यत्वादिकथनमपि भृशमनर्थकम् । एवं माठरवृत्तावपि यथाकथञ्चित् संग्रन्थनमेव । अतो वाचस्पत्यादीनां पुरत एव लुप्तेयं कारिका ।

यस्तु ' ननु ईश्वरनिरासासहिष्णुत्वं कारिकाविलोपे प्रयोजकं चेत्, कथं नाम तद्भाष्यविलोपे प्रयोजकं न स्यात् ' इति सूर्यनारायणशास्त्र्यभिप्रायस्तत्र ब्रूमः--यस्य खलु कुटिलमतेः स्वानभिमतेयं कारिका दृष्टिपथं याता, न तस्य भाष्यं दृग्गोचरी-भूतमिति सम्भाव्यते । न खलु भाष्यकारिकयोरव्यभिचारि सहावस्थानं, येन कारिकां निस्सारयन् भाष्यमपि बहिः कुर्यात् । भाष्यं चास्मद्भाग्यवशान्न तद्धस्ते पतितम् । अतस्तादृशकुटिलमत्यनन्तरभाविभिर्लेखकैर्लेखकेन वा मूलकारिकाविहीनं भाष्यमेत-द्विलोक्य यथाकथञ्चिदेकषष्टितमकारिकाभाष्ये नियोजितमिति राद्धान्तः ॥

अधुनापि प्राचीनहस्तलिखितपुस्तकेषु मूलग्रंथः टीकाग्रंथश्च पृथक् पृथक् लेखनावस्थितित्वेन दृश्येते । तेन मूलग्रंथस्थिता कारिका च्याविततैव । भाष्यग्रंथस्य तत्समये अप्राप्तत्वात् भाष्यस्य अद्यापि स्थितिरस्ति ।



तथा च लोके रूढं पुरुषो मुक्तः पुरुषः संसरतीति चोदिते आह[2]—

**तस्मान्न बध्यते नापि[3] मुच्यते नापि संसरति कश्चित् ।**
**संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः ॥ ६२ ॥**

**६२ अन्वयः ।**—तस्मात् कश्चित् (पुरुषः) न बध्यते, नापि मुच्यते नापि संसरति । प्रकृतिः संसरति बध्यते मुच्यते च ।

**तस्मात्** कारणात् पुरुषो **न बध्यते नापि मुच्यते नापि संसरति** यस्मात् कारणात् **प्रकृतिरेव नानाश्रया** दैवमानुषतिर्यग्योन्याश्रया बुद्ध्यहङ्कारतन्मात्रेन्द्रियभूतस्वरूपेण **बध्यते मुच्यते संसरति** चेति ।

अथ मुक्त एव स्वभावात् स सर्वगतश्च कथं संसरति—अप्राप्तप्रापणार्थं संसरणमिति । तेन पुरुषो बध्यते पुरुषो मुच्यते पुरुषः संसरतीति[5] व्यपदिश्यते येन संसारित्वं न[6] विद्यते । सत्त्वपुरुषान्तरज्ञानात् तत्त्वं पुरुषस्याभिव्यज्यते, तदभिव्यक्तौ केवलः शुद्धो मुक्तः स्वरूपप्रतिष्ठः पुरुष इति ।

अत्र यदि पुरुषस्य बन्धो नास्ति ततो मोक्षोऽपि नास्ति । अत्रोच्यते—प्रकृतिरेवात्मानं बध्नाति मोचयति च । यत्र सूक्ष्मशरीरं तन्मात्रकं त्रिविधकरणोपेतं तत् त्रिविधेन बन्धेन बध्यते । उक्तं च—

प्राकृतेन च बन्धेन तथा वैकारिकेण च ।
दाक्षिणेन तृतीयेन बद्धो नान्येन मुच्यते ॥

तत् सूक्ष्मं शरीरं धर्माधर्मसंयुक्तम् ॥ ६२ ॥

प्रकृतिश्च बध्यते प्रकृतिश्च मुच्यते संसरतीति कथं तत्--उच्यते--

**रूपैः सप्तभिरेव तु[7] बध्नात्यात्मानमात्मना प्रकृतिः ।**
**सैव च पुरुषार्थं[8] प्रति विमोचयत्येकरूपेण ॥ ६३ ॥**

१. मदीयः पाठः । ब०-वि०-पुस्तकयोस्तु ' श्लोके ' ।
२. वि०-चोदितेत्याह ।
३. वा०-अद्धा न ।
४. ' पुरुषः ' इति वि०-पुस्तके नास्ति ।
५. वि०-संसरति ।
६. ' न ' इति ब० पुस्तके नास्ति ।
७. वा०-ज०-चन्द्रिकाधृतः पाठः । वि०-पुस्तके ' तु ' इति नास्ति । मा०-रेवं ।
८. मा०-पुरुषस्यार्थं ।

६३ अन्वयः ।—प्रकृतिरेव तु पुरुषार्थं प्रति सप्तभिः रूपैः आत्मना आत्मानं बध्नाति । सैव च एकरूपेण विमोचयति ( आत्मानं ) ।

रूपैः सप्तभिरेव । एतानि सप्त प्रोच्यन्ते——धर्मः, ज्ञानं, वैराग्यं, ऐश्वर्यं, अधर्मः, अज्ञानं, अवैराग्यं, अनैश्वर्यं——एतानि प्रकृतेः सप्त रूपाणि । तैरात्मानं स्वं बध्नाति प्रकृतिः आत्मना स्वेनैव[1] । सैव प्रकृतिः पुरुषस्यार्थः पुरुषार्थः कर्तव्य इति विमोचयत्यात्मानमेकरूपेण ज्ञानेन ॥ ६३ ॥

---

कथं तज्ज्ञानमुत्पद्यते——

**एवं तत्त्वाभ्यासान्नास्मि[2] न मे नाहमित्यपरिशेषम् ।**
**अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम् ॥ ६४ ॥**

६४ अन्वयः ।——एवं तत्त्वाभ्यासात् नास्मि नाहम् न मे ( इति ) अपरिशेषम् अविपर्ययात् विशुद्धं केवलं ज्ञानं उत्पद्यते ।

एवमुक्तक्रमेण पञ्चविंशतितत्त्वालोचनाभ्यासात्, इयं प्रकृतिः, अयं पुरुषः, एतानि पञ्चतन्मात्रेन्द्रियमहाभूतानीति पुरुषस्य ज्ञानमुत्पद्यते—— नास्मि[3] नाहमेव भवामि, न मे मम शरीरं तत्, यतोऽहमन्यः शरीर-मन्यत् । नाहमित्यपरिशेषं, अहङ्काररहितमपरिशेषम्[4] ।

अविपर्ययाद्विशुद्धम् । विपर्ययः संशयः, अविपर्ययादसंशयात्, विशुद्धं केवलं, तदेव नान्यदस्तीति मोक्षकारणमुत्पद्यतेऽभिव्यज्यते ज्ञानं पञ्चविंशतितत्त्वज्ञानं पुरुषस्येति ॥ ६४ ॥

---

ज्ञाने पुरुषः किं करोति——

**तेन निवृत्तप्रसवामर्थवशात् सप्तरूपविनिवृत्ताम् ।**
**प्रकृतिं पश्यति पुरुषः प्रेक्षकवदवस्थितः स्वस्थः[5] ॥ ६५ ॥**

---

१. वि०— आत्मानं स्वमेव ।

२. ब०— पुस्तकधृतभाष्यसंमतः पाठः । ज०-वा०—न्नास्मि । वि०— न्नास्ति ।

३. वि०—नास्ति ।

४. ' अहङ्काररहितमपरिशेषम् ' इति ब०— पुस्तके नास्ति ।

५. भाष्यसंमतः, ज०-मा०-संमतश्च पाठः । वि०—सुस्थः । वा०—स्वच्छः ।



६५ अन्वयः ।— तेन निवृत्तप्रसवां अर्थवशात् सप्तरूपविनिवृत्तां प्रकृतिं स्वस्थः पुरुषः प्रेक्षकवत् अवस्थितः पश्यति ।

तेन विशुद्धेन केवलज्ञानेन पुरुषः प्रकृतिं पश्यति । प्रेक्षकवत् प्रेक्षकेण तुल्यम् । अवस्थितः स्वस्थः । यथा रङ्गप्रेक्षकोऽवस्थितो नर्तकीं पश्यति । स्वस्थः, स्वस्मिंस्तिष्ठति स्वस्थः, स्वस्थानस्थितः ।

कथम्भूतां प्रकृतिं—— निवृत्तप्रसवाम् । निवृत्तबुद्ध्यहङ्कारकार्याम्[1] । अर्थवशात् सप्तरूपविनिवृत्ताम् । निवर्तितोभयपुरुषप्रयोजनवशात्[2], यैः सप्तभी रूपैर्धर्मादिभिरात्मानं बध्नाति तेभ्यः सप्तभ्यो रूपेभ्यो विनिवृत्तां[3] प्रकृतिं पश्यति ॥ ६५ ॥

---

**रङ्गस्थ[4] इत्युपेक्षक एको दृष्टाहमित्युपरमत्येका[5] ।**
**सति संयोगेऽपि तयोः प्रयोजनं नास्ति सर्गस्य ॥ ६६ ॥**

६६ अन्वयः ।— एकः रङ्गस्थ इति उपेक्षकः । एका ' अहं दृष्टा ' इति उपरमति । तयोः संयोगे सति अपि सर्गस्य प्रयोजनं नास्ति ।

रङ्गस्थ इति । यथा रङ्गस्थ इत्येवमुपेक्षक एकः केवलः शुद्धः पुरुषः । तेनाहं दृष्टेति कृत्वा उपरता निवृत्ता, एका एकैव प्रकृतिः त्रैलोक्य-स्यापि प्रधानकारणभूता । न द्वितीया प्रकृतिरस्ति, मूर्तिभेदे[6] जातिभेदात् ।

एवं प्रकृतिपुरुषयोर्निवृत्तावपि व्यापकत्वात् संयोगोऽस्ति, न तु संयोग-कृतः सर्गः । सति संयोगेऽपि तयोः । प्रकृतिपुरुषयोः सर्वगतत्वात् सत्यपि संयोगे प्रयोजनं नास्ति सर्गस्य, सृष्टेश्चरितार्थत्वात् । प्रकृतेर्द्विविधं प्रयो-जनम्——शब्दविषयोपलब्धिर्गुणपुरुषान्तरोपलब्धिश्च । उभयत्रापि चरितार्थ-त्वात् सर्गस्य नास्ति प्रयोजनं, यः पुनः सर्ग इति । यथा दानग्रहणनिमित्त

---

१. वि०-निवृत्तः बुद्ध्यहङ्कारकार्या ।

२. ब०-निवर्तितपुरुषोभयप्रयोजन-वशात् ।

३. वि० -विनिवृत्तिं ।

४. भाष्यसंमतः पाठः । सर्वैरन्यैष्टी-काङ्क्षि:, वि०-पुस्तकेन च 'दृष्टा मया ' इति पाठो धृतः ।

५. भाष्यसंमतः पाठः । वि०- °रमत्यन्या ।

६. ब०-मूर्तिवधे ।

उत्तमर्णाधमर्णयोर्द्रव्यविशुद्धौ सत्यपि संयोगे न कश्चिदर्थसम्बन्धो भवति, एवं प्रकृतिपुरुषयोरपि नास्ति प्रयोजनमिति ॥ ६६ ॥

---

यदि पुरुषस्योत्पन्ने ज्ञाने मोक्षो भवति ततो मम कस्मान्न भवति—इत्यत उच्यते—

**सम्यग्ज्ञानाधिगमाद्धर्मादीनामकारणप्राप्तौ ।**
**तिष्ठति संस्कारवशाच्चक्रभ्रमवद्धृतशरीरः[1] ॥ ६७ ॥**

६७ **अन्वयः** ।— सम्यग्ज्ञानाधिगमात् धर्मादीनाम् अकारणप्राप्तौ संस्कारवशात् चक्रभ्रमवत् धृतशरीरः तिष्ठति ।

यद्यपि पञ्चविंशतितत्त्वज्ञानं सम्यक् ज्ञानं भवति, तथापि **संस्कारवशात् धृतशरीरो** योगी **तिष्ठति** कथम्—**चक्रभ्रमवत्**, चक्रभ्रमेण तुल्यम् । यथा कुलालश्चक्रं भ्रमयित्वा घटं करोति मृत्पिण्डं चक्रमारोप्य, पुनः कृत्वा घटं पर्यामुञ्चति, चक्रं भ्रमत्येव संस्कारवशात् ।

एवं **सम्यग्ज्ञानाधिगमात्**, उत्पन्नसम्यग्ज्ञानस्य **धर्मादीनामकारणप्राप्तौ** । एतानि सप्तरूपाणि बन्धनभूतानि सम्यग्ज्ञानेन दग्धानि, यथा नाग्निना दग्धानि बीजानि प्ररोहणसमर्थानि, एवमेतानि धर्मादीनि बन्धनानि न समर्थानि । धर्मादीनामकारणप्राप्तौ संस्कारवशात् धृतशरीरस्तिष्ठति । ज्ञानाद्वर्तमानधर्माधर्मक्षयः कस्मान्न भवति वर्तमानत्वादेव, क्षणान्तरे क्षयमप्येति । ज्ञानं त्वनागतकर्म दहति, वर्तमानशरीरेण च यत्करोति तदपीति, विहितानुष्ठानकरणादिति । संस्कारक्षयाच्छरीरपाते मोक्षः ॥ ६७ ॥

---

स किंविशिष्टो भवतीत्युच्यते—

**प्राप्ते शरीरभेदे चरितार्थत्वात् प्रधानविनिवृत्तौ ।**
**ऐकान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति ॥ ६८ ॥**

६८ **अन्वयः** ।— शरीरभेदे प्राप्ते चरितार्थत्वात् प्रधानविनिवृत्तौ ( सत्याम् ) ऐकान्तिकम् आत्यन्तिकम् उभयं कैवल्यम् आप्नोति ।

---

१. वा०-°भ्रमिवद्धृतशरीरः ।



धर्माधर्मजनितसंस्कारक्षयात् **प्राप्ते शरीरभेदे चरितार्थत्वात्[1] प्रधानस्य निवृत्तौ**, ऐकान्तिकमवश्यं, आत्यन्तिकमनन्तर्हितं **कैवल्यं**, केवलभावान्मोक्षः, **उभयमैकान्तिकात्यन्तिकमित्येवंविशिष्टं कैवल्यमाप्नोति** ॥ ६८ ॥

---

**पुरुषार्थज्ञानमिदं गुह्यं परमर्षिणा समाख्यातम् ।**
**स्थित्युत्पत्तिप्रलयाश्चिन्त्यन्ते यत्र भूतानाम् ॥ ६९ ॥**

६९ **अन्वयः** ।— इदं गुह्यं पुरुषार्थज्ञानम् परमर्षिणा समाख्यातम् यत्र भूतानाम् स्थित्युत्पत्तिप्रलयाः चिन्त्यन्ते ।

**पुरुषार्थो** मोक्षः, तदर्थ**मिदं गुह्यं** रहस्यं **परमर्षिणा** श्रीकपिलर्षिणा **समाख्यातं**, सम्यगुक्तम् । **यत्र** ज्ञाने **भूतानाम्** वैकारिकाणां **स्थित्युत्पत्तिप्रलया** अवस्थानाविर्भावतिरोभावा**श्चिन्त्यन्ते** विचार्यन्ते । येषां विचारात् सम्यक् पञ्चविंशतितत्त्वविवेचनात्मिका सम्पद्यते संवित्तिरिति ॥ ६९ ॥

सांख्यं कपिलमुनिना प्रोक्तं संसारविमुक्तिकारणं हि ।
यत्रैताः सप्ततिरार्या भाष्यं चात्र गौडपादकृतम् ॥

---

**एतत्पवित्रमग्र्यं मुनिरासुरयेऽनुकम्पया प्रददौ ।**
**आसुरिरपि पञ्चशिखाय तेन च बहुधा कृतं तन्त्रम् ॥ अ ॥**
**शिष्यपरम्परयाऽऽगतमीश्वरकृष्णेन चैतदार्याभिः ।**
**संक्षिप्तमार्यमतिना सम्यग्विज्ञाय सिद्धान्तम् ॥ आ ॥**
**सप्तत्यां किल येऽर्थास्तेऽर्थाः कृत्स्नस्य षष्टितन्त्रस्य ।**
**आख्यायिकाविरहिताः परवादविवर्जिताश्चापि ॥ इ ॥**

**अ । अन्वयः** ।—मुनिः एतत् अग्र्यं पवित्रं अनुकम्पया आसुरये प्रददौ । आसुरिरपि पञ्चशिखाय ( प्रददौ ) तेन च बहुधा तन्त्रं कृतम् ।

**आ । अन्वयः** ।—शिष्यपरम्परया आगतम् एतत् आर्यमतिना ईश्वरकृष्णेन सिद्धान्तं सम्यग् विज्ञाय आर्याभिः संक्षिप्तम् ।

**इ । अन्वयः** ।—सप्तत्यां ये अर्थाः किल ते कृत्स्नस्य षष्टितंत्रस्य अर्थाः आख्यायिकाविरहिताः परवादविवर्जिताश्चापि ।

**समाप्ता इमाः सगौडपादभाष्याः सांख्यकारिकाः ॥**

---

१. ' प्राप्ते शरीरभेदे चरितार्थत्वात् ' इति ब०-पुस्तके नास्ति ।

creative commons

## Attribution-NonCommercial-ShareAlike 3.0 Unported

### You are free:

**to Share** — to copy, distribute and transmit the work

**to Remix** — to adapt the work

### Under the following conditions:

**Attribution** — You must attribute the work in the manner specified by the author or licensor (but not in any way that suggests that they endorse you or your use of the work).

**Noncommercial** — You may not use this work for commercial purposes.

**Share Alike** — If you alter, transform, or build upon this work, you may distribute the resulting work only under the same or similar license to this one.

### With the understanding that:

**Waiver** — Any of the above conditions can be **waived** if you get permission from the copyright holder.

**Public Domain** — Where the work or any of its elements is in the **public domain** under applicable law, that status is in no way affected by the license.

**Other Rights** — In no way are any of the following rights affected by the license:

- Your fair dealing or **fair use** rights, or other applicable copyright exceptions and limitations;
- The author's **moral** rights;
- Rights other persons may have either in the work itself or in how the work is used, such as **publicity** or privacy rights.

**Notice** — For any reuse or distribution, you must make clear to others the license terms of this work. The best way to do this is with a link to this web page.

This is a human-readable summary of the Legal Code (the full license). Disclaimer